| (5) | ,, 6/3 | दैवो विस्तरशः प्रोक्तः | दैवो विस्तरतः प्रोक्तः (T and C) | |
| (6) | ,, 9/4 | क्षयाय जगतोऽहिताः | क्षयाय जगतोऽशुभाः (T) | |
| (7) | ,, 10/2 | दम्भमानमदान्विताः | दम्भलोभमदान्विताः (T and C) | |



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



| S. No. | Chapter, verse and verse-quarter in the vulgate | Reading in the N. S. P. edition of the vulgate | Reading in the Kāśmir recension | Remarks |
|---|---|---|---|---|
| 222 | **16**.10/3-4 | मोहाद्गृहित्वासद्ग्राहान्प्रवर्तन्तेऽशुचिव्रताः ॥ | असद्ग्राहाश्रिताः क्रूराः प्रचरन्ति अशुचिव्रताः ॥ | |
| | ,, (8,9, 10,11) | | | |
| 223 | ,, 16/2 | मोहजालसमावृताः | मोहस्यैव वशं गताः | |
| 224 | ,, ,, /4 | पतन्ति नरकेऽशुचौ | पतन्ति निरयेऽशुचौ | |
| | ,, (12,13) | | | |
| 225 | ,, 19/3 | क्षिपाम्यजस्रं अशुभान् | क्षिपाम्यजस्रं अशुभासु | |
| | ,, (14,15, 16,17,18) | | | |
| 226 | **17**.1/2 | यजन्ते श्रद्धयान्विताः | वर्तन्ते श्रद्धयान्विताः | |
| 227 | ,, 2/4 | तामसी चेति तां शृणु | तामसी चेति ताः शृणु | |
| 228 | ,, 4/3 | प्रेतान्भूतगणांश्चान्ये | भूतप्रेतपिशाचान् च[1] | |

| | | | |
|---|---|---|---|
| (8) | **16**.12/3 | ईहन्ते कामभोगार्थम् | ईहन्ते कामलोभार्थम् (S and J) ईहन्ते कामभोगार्थान् (T) |
| (9) | ,, 13/2 | इमं प्राप्स्ये मनोरथम् | इदं प्राप्स्ये मनोरथम् (S and T) |
| (10) | ,, 14/3 | ईश्वरोऽहमहं भोगी | ईश्वरोऽहमहं योगी (J) |
| (11) | ,, 16/1 | अनेकचित्तविभ्रान्ताः | अनेकचित्ताः विभ्रान्ताः (T and C) |
| (12) | ,, 17/1 | आत्मसंभाविताः स्तब्धाः | आत्मसंभाविनः स्तब्धाः(T) |
| (13) | ,, 17/3 | यजन्ते नामयज्ञैस्ते | यजन्ते नाम यज्ञैस्ते (T) |
| (14) | ,, 20/2 | मूढा जन्मनि जन्मनि | नरा जन्मनि जन्मनि (C) |
| (15) | ,, 21/4 | तस्मादेतत्त्रयं त्यजेत् | तस्मादेतत्त्रयं त्यज (T&C) |
| (16) | ,, 22/2 | एतैर्विमुक्तः कौन्तेय | एतैर्वियुक्तः कौन्तेय(T&C) |
| (17) | ,, 23/2 | वर्तते कामकारतः | वर्तते कामचारतः (T) वर्तते कामकातरः । (T) |
| (18) | ,, 24/3 | ज्ञात्वा शास्त्रविधानोक्तम् | कृत्वा शास्त्रविधानोक्तम् (T and C) |
| (1) | **17**.4/3 | प्रेतान्भूतगणांश्चान्ये | भूतान्प्रेतपिशाचांश्च (In S and T as an alternative reading and in C as the only one). |



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## *Critical Apparatus of Section B*

| S. No. | Chapter, verse and verse-quarter in the vulgate | Reading in the N. S. P. edition of the vulgate | Reading in the Kāśmir recension | Remarks |
|---|---|---|---|---|
| | 17.(2) | | | |
| 229 | ,, 6/2 | भूतग्रामं अचेतसः | भूतग्रामं अचेतनम् | The word भूतग्रामम् has been included in Section B although it is common to both the recensions because the next word changes the spirit of the sentence. |
| | ,, (3,4,5) | | | |
| 230 | ,, 12/3-4 | इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम् ॥ | इज्यते विद्धि तं यज्ञं राजसं चलमध्रुवम् ॥ | Not noted in C. |
| 231 | ,, 13/1 | विधिहीनं असृष्टान्नम् | विधिहीनं असृष्टान्नम् | |
| | ,, (6,7) | | | |
| 232 | ,, 21/4 | तद्दानं राजसं स्मृतम् । | तद्राजसं इति स्मृतम् ॥ | |
| 233 | ,, 23/3 | ब्राह्मणास्तेन वेदाश्च | ब्रह्मणा तेन वेदाश्च | |
| 234 | ,, 26/4 | सच्छब्दः पार्थ युज्यते | सच्छब्दः पार्थ गीयते । | |
| | 18.(1,2) | | | |
| 235 | ,, 6/1 | एतान्यपि तु कर्माणि | एतान्यपि च कर्माणि | |
| 236 | ,, 7/1 | नियतस्य तु संन्यासः | नियतस्य च संन्यासः | |
| 237 | ,, 8/1 | दुःखमित्येव यत्कर्म | दुःखमित्येव यः कर्म | |
| 238 | ,, 13/1 | पञ्च एतानि महाबाहो | पञ्च इमानि महाबाहो | Śaṅkara (J. H. P. edition). |

| | | | |
|---|---|---|---|
| (2) | 17.5/2 | तप्यन्ते ये तपो जनाः | तपस्तप्यन्ति ये जनाः (T and C) |
| (3) | ,, 9/4 | दुःखशोकामयप्रदाः | हर्षशोकामयप्रदाः (T) |
| (4) | ,, 11/3 | यष्टव्यमेवेति | यष्टव्यमित्येव (T and C) |
| (5) | ,, 12/2 | चैव यत् | चैव यः (C) |
| (6) | ,, 17/1 | श्रद्धया परया तप्तं । | श्रद्धया परयोपेतं (C) |
| (7) | ,, 19/1 | मूढग्राहेणात्मनः | मूढग्रहेणात्मनः (T) |
| (1) | 18.2/1 | काम्यानां कर्मणां न्यासम् | काम्यानां कर्मणां त्यागम् ( T and C ) |
| (2) | ,, 4/4 | त्रिविधः संप्रकीर्तितः | त्रिविधः संप्रदर्शितः (S,T, & R according to C) |



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



| S. No. | Chapter, verse and verse-quarter in the vulgate | Reading in the N. S. P. edition of the vulgate | Reading in the Kāśmir recension | Remarks |
|---|---|---|---|---|
| | 18.(3) | | | |
| 239 | „ 15/1-2 | शरीरवाङ्मनोभिः यत् कर्म प्रारभते नरः । | शरीरवाङ्मनोभिः हि यत्कर्म आरभतेऽर्जुन | |
| | „ (4,5,6,7) | | | |
| 240 | „ 21/4 | तज्ज्ञानं विद्धि राजसम् ॥ | तद्राजसं इति स्मृतम् (8) | |
| 241 | „ 22/1 | यत्तु कृत्स्नवत् एकस्मिन् | यत् अकृत्स्नविद् एकस्मिन् | |
| 242 | „ 22/2 | कार्ये सक्तं अहैतुकम् | कार्ये सक्तं अहेतुकम् | |
| 243 | „ 24/3 | क्रियते बहुलायासम् | क्रियते क्लेशबहुलम् | |
| 244 | „ „ /4 | तद्राजसं उदाहृतम् | तद्राजसं इति स्मृतम् | |
| 245 | „ 25/2 (10,11, 12,13) | अनपेक्ष्य च पौरुषम् | अनवेक्ष्य च पौरुषम् (9) | |
| 246 | „ 28/3 „ (14) | विषादी दीर्घसूत्री च | विषादी दीर्घसूत्रः च | |
| (3) | 18.14/4 | दैवं चैवात्र पञ्चमम् | दैवमेवात्र पञ्चमम् (T and C) | |
| (4) | „ 15/4 | पञ्चैते तस्य हेतवः | पञ्च ते तस्य हेतवः (J) | |
| (5) | „ 18/3 | करणं कर्म कर्तेति | कारणं कर्म कर्तेति (T) | |
| (6) | „ 20/2 | भावमव्ययमीक्षते | भावमव्ययं वीक्षते (S&T) भावमव्ययमश्नुते (S & T) | |
| (7) | „ 21/1 | पृथक्त्वेन तु यज्ज्ञानम् | पृथक्त्वेन च यज्ज्ञानम् (S and T) | |
| (8) | „ 22/1 | यत्तु कृत्स्नवदेकस्मिन् | यत्त्वकृत्स्नवित् (In T as an alternative and in C as the only one). | |
| (9) | „ 25/2 | अनपेक्ष्य च पौरुषम् | अनवीक्ष्य च पौरुषम् (T as an alternative) | |
| (10) | „ „ /4 | तत्तामसमुच्यते | तत्तामसमुदाहृतम् (S & T) | |
| (11) | „ 26/3 | सिद्ध्यसिद्ध्योर्निर्विकारः | सिध्यसिध्योर्निर्विकल्पः (T) | |
| (12) | „ 27/4 | राजसः परिकीर्तितः | राजसः परिकीर्त्यते (T & C) | |
| (13) | „ 28/2 | नैष्कृतिकोऽलसः | नैकृतिकोऽलसः (S & T) | |
| (14) | „ 30/3-4 | बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी ॥ | बन्धं मोक्षं च या बुद्धिर्वेद सा सात्त्विकी मता ॥ (T and C) बन्धं मोक्षं च या वेत्ति बुद्धिः सा सात्त्विकी मता ॥ (S and T as an alternative) | |



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## *Critical Apparatus of Section B*

| S. No. | Chapter, verse and verse-quarter in the vulgate | Reading in the N. S. P. edition of the vulgate | Reading in the Kāśmir recension | Remarks |
|---|---|---|---|---|
| | 15,16) | | | |
| 247 | ,, 32/4 | बुद्धिः सा पार्थ तामसी | बुद्धिः सा तामसी मता | |
| | ,, (17,18) | | | |
| 248 | ,, 36/1-2 | सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ । | सुखं त्विदानीं शृणु मे त्रिविधं भरतर्षभ । | |
| 249 | ,, 37/1 | यत् तदग्रे विषमिव | यत् तदात्वे विषमिव(19) | |
| 250 | ,, ,, /3 | सात्त्विकं प्रोक्तम् | सात्त्विकं विद्यात् | |
| 251 | ,, 38/2 | यत्तदग्रेऽमृतोपमम् | यत्तदात्वेऽमृतोपमम् | |
| 252 | ,, ,, /4 | तत्सुखं राजसं स्मृतम् | तद्राजसं इति स्मृतम् | |
| | ,, (20,21, 22,23) | | | |
| (15) | ,, 31/3 | अयथावत्प्रजानाति | यथावन्नाभिजानाति (J) | |
| (16) | ,, 32/1-2 | अधर्मं धर्ममिति या मन्यते तमसावृता । | अधर्मं धर्ममिति या बुध्यते तमसान्विता (S, T and C) मन्यते (S) | |
| (17) | ,, 33/4 | सा पार्थ सात्त्विकी | सा सात्त्विकी मता (C) | |
| (18) | ,, 35/4 | धृतिः सा पार्थ तामसी | धृतिः सा तामसी मता (S and J) (The same in T as an alternative) ...................स्मृता (R. according to C) | Śaṅkara |
| (19) | ,, 37/1 | यत्तदग्रे विषमिव | यत्तदात्वे विषमिव (T as an alternative) | |
| (20) | ,, 42/1 | शमो दमस्तपः शौचम् | शमो दमस्तथा शौचम् (S and T) | |
| (21) | ,, ,, /2 | ब्रह्मकर्म स्वभावजम् | ब्राह्मकर्म स्वभावजम् (S, T and C) | |
| (22) | ,, 43/4 | क्षात्रं कर्म स्वभावजम् | क्षात्रकर्म स्वभावजम् (T) | क्षात्रकर्म स्वभावजम् according to Śaṅkara and other comm. in the G. P. edition of 1935. |
| (23) | ,, 44/1 | कृषिगोरक्ष्यवाणिज्यम् | कृषिगोरक्षवाणिज्यम् (J) कृषिगौरक्ष्यवाणिज्यम् (T) | |



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



| S. No. | Chapter, verse and verse-quarter in the vulgate | Reading in the N. S. P. edition of the vulgate | Reading in the Kāśmir recension | Remarks |
|---|---|---|---|---|
| 253 | „ 44/3 | परिचर्यात्मकं कर्म | पर्युत्थानात्मकं कर्म | |
| 254 | „ 46/2 | येन सर्वं इदं ततम् | येन विश्वं इदं ततम् | |
| 255 | „ „ /3 | स्वकर्मणा तं अभ्यर्च्य | स्वकर्मणा तं एवार्च्य | |
| 256 | „ 47/3-4 | स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥ | स्वधर्मे निधनं श्रेयः परधर्मोदयादपि ॥ | |
| 257 | „ „ /5-6 | .................... | स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥ | |
| 258 | „ 50/2 | तथाप्नोति निबोध मे | प्राप्नोति तन्निबोध मे (24) | |
| | „ (25,26) | | | |
| 259 | „ 54/2 | न शोचति न काङ्क्षति | न शोचति न हृष्यति | |
| 260 | „ 55/2 | यावान्यश्चास्मि | योऽहं यश्चास्मि | |
| | „ (27,28) | | | |
| 261 | „ 57/3 | बुद्धियोगमुपाश्रित्य | बुद्धियोगं समाश्रित्य | |
| | „ (29,30) | | | |
| 262 | „ 59/3 | मिथ्या एषः व्यवसायस्ते | मिथ्या एव अध्यवसायस्ते | |
| | „ (31) | | | |
| 263 | „ 60/4 | करिष्यस्यवशोऽपि तत् | करिष्यस्यवशोऽपि सन् | |
| 264 | „ 61/2 | हृद्देशेऽर्जुन तिष्ठति | हृद्येषो वसते अर्जुन(32) | |

| | | | |
|---|---|---|---|
| (24) | „ 50/2 | तथाप्नोति निबोध मे | तदाप्नोति निबोध मे (T and C) |
| (25) | „ „ /3 | समासेनैव कौन्तेय | समासेन तु कौन्तेय (S, J and C) |
| (26) | „ „ /4 | निष्ठा ज्ञानस्य या परा | निष्ठा ध्यानस्य या परा (S and T) |
| (27) | „ 55/3 | ततो मां तत्त्वतो ज्ञात्वा | ततोऽसौ तत्त्वतो ज्ञात्वा(T) |
| (28) | „ 57/2 | मयि संन्यस्य मत्परः | मयि संन्यस्य भारत (T and C) |
| (29) | „ 58/3-4 | अहङ्कारान्न श्रोष्यसि | अहङ्कारं न मोक्ष्यसि (T and C) |
| (30) | „ 59/2 | न योत्स्य इति मन्यसे | न योत्स्यामीति मन्यसे (S and T) |
| (31) | „ „ /4 | प्रकृतिस्त्वां नियोक्ष्यति | प्रकृतिस्त्वा नियोक्ष्यते (T and C) |
| (32) | „ 61/2 | हृद्देशेऽर्जुन तिष्ठति | हृद्देशे वसतेऽर्जुन (T) |



For Private and Personal Use Only

## *Critical Apparatus of Section B*

| S. No. | Chapter, verse and verse-quarter in the vulgate | Reading in the N. S. P. edition of the vulgate | Reading in the Kāśmīr recension | Remarks |
|---|---|---|---|---|
| | 18.(33) | | | |
| 265 | „ 63/4 | यथा इच्छसि तथा कुरु | **यत्** इच्छसि तथा कुरु | |
| | „ (34) | | | |
| 266 | „ 68/4 | मामेवैष्यत्यसंशयः | **स** मामेष्यति **असंशयम्** | |
| | „ (35,36,37) | | | |
| 267 | „ 75/2 | एतद्गुह्यमहं परम् | एतद् **गुह्यतरं महत्** (38) | |
| | „ (39,40, 41,42) | | | |
| 268 | „ 77/3-4 | विस्मयो मे महान् राजन् हृष्यामि च पुनः पुनः ॥ | **विस्मयो** मे **महाराज प्रहृष्ये** च पुनः पुनः ॥ | |
| | „ (43) | | | |
| 269 | „ 78/4 | ध्रुवा नीतिर्मतिर्मम ॥ | ध्रुवा **इति** मतिर्मम ॥ | R reads स्थिरा according to C. |

| | | | |
|---|---|---|---|
| (33) | 18.62/4 | स्थानं प्राप्स्यसि शाश्वतम् | सिद्धिं प्राप्स्यसि शाश्वतीम् (T and C) |
| (34) | „ 64/3 | इष्टोऽसि मे दृढमिति | इष्टोऽसि मे दृढमतिः (T and C) |
| (35) | „ 69/4 | अन्यः प्रियतरो भुवि | अन्यः प्रियतमो भुवि (T) |
| (36) | „ 73/3 | स्थितोऽस्मि गतसंदेहः | स्थितोऽस्मि गतसंमोहः (T) |
| (37) | „ 74/4 | अद्भुतं रोमहर्षणम् | अद्भुतं लोमहर्षणम् (T) |
| (38) | „ 75/2 | एतद्गुह्यमहं परम् | इमं गुह्यतमं परम् / एतं गुह्यमनुत्तमम् } (T) |
| (39) | „ „ /3 | योगं योगेश्वरात्कृष्णात् | योगं योगीश्वरात्कृष्णात् (T and C) |
| (40) | „ 76/2 | संवादमिममद्भुतम् | संवादमिदमद्भुतम् (T) |
| (41) | „ „ /4 | हृष्यामि च मुहुर्मुहुः | हृष्यामीति मुहुर्मुहुः (T) |
| (42) | „ 77/1 | तच्च संस्मृत्य संस्मृत्य | तच्च संस्मृत्य परमम् (T and C) |
| (43) | „ 78/1 | यत्र योगेश्वरः कृष्णः | यत्र योगीश्वरः कृष्णः (S, T and C) |

The total number of the common variants is thus 269 and the total number of the words in thick types (including those in the additional lines and stanzas) which have been taken up for the Index in Section B is 426. Some of these words which are new are listed separately in Section C of this Part. See also Appendix III.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## APPENDIX III

## *ADDENDA TO SECTION B*

The comparative study of Dr. Chintamani's edition of the Kāśmīr Recension revealed an agreement of some of the variant readings given therein with those in two of the three original sources which had been relegated to the foot-notes. Those variants can therefore be taken to pertain to the Kāśmīr Recension and in that case the new words and additional references occurring therein should be inserted at their proper places in Section B. They are therefore given below :—

**अ**

21*a*. **अनन्यमानसः** Nom. sing. of the mas. comp. noun Ananyamānas (One whose mind is not diverted to any other object) **6**. $15/_{2}$.

38*a*. **अभिमानिता** Nom. sing. of the fem. noun Abhimānitā (The quality of being proud) **16**. $3/_{2}$.

49*a*. **अलौल्यम्** Nom. sing. of the neu. comp. noun Alaulya (Absence of fickleness or greediness) **16**. $2/_{3}$.

**इ**

79*a*. **इतः** Adv. Ind. **10**. $8/_{2}$.

**उ**

89*a*. **उक्तेन** Inst. sing. of the past pass. participial adj. Ukta (Said or narrated) **10**. $42/_{1}$.

**ए**

104. **एवम्** After **9**. 6-1 add "**11**. $48/_{2}$."

**च**

150. **च** Between **16**. and $8/_{1}$ add "$2/_{3}$."

**ज**

157*a*. **जातु** An Ind. particle (Ever) **6**. $40/_{4}$.

161*a*. **ज्ञानेन** Inst. sing. of the neu. noun Jñāna (Knowledge) **10**. $42/_{2}$.

**त**

166*a*. **तत्परः** Nom. sing. of the mas. form of the comp. adj. Tatpara (Devoted to it) **2**. $61/_{2}$.

169*a*. **तमसान्विता** Nom. sing. of the fem. form of the comp. adj. Tamasānvita (Endowed with the attribute Tamas) **18**. $33/_{4}$.

175. **तु** Add "**18**. $50/_{3}$" at the end.

176. **तुष्टिः** After the figure $3/_{1}$ add "or $3/_{2}$."

185. **त्वा** Between **11**. $21/_{1}$ and $32/_{3}$ add "$24/_{3}$."

**प**

243*a*. **प्रजहीहि** An alternative spelling of the imp. 2nd pers. sing. of the root Hā with the prefix Pra (To abandon or shake off) **3**. $41/_{3}$.

**ब**

254*a*. **बुध्यते** Pass. 3rd pers. sing. of the root Budh (To know) **18**. $32/_{2}$.

257*a*. **ब्राह्मकर्म** Nom. sing. of the neu. comp. noun Brāhmakarma (Action suited to a Brāhmana) **18**. $42/_{2}$.

**म**

272. **मद्भक्तः** Before the figure **9**. $31/_{4}$ insert "**6**. $15/_{2}$."

**र**

312*a*. **रूपम्** Nom. sing. of the neu. noun Rūpa (Form) **11**. $48/_{3}$.

**श**

356. **शक्यम्** After the figure **11**. 44-2 add "$48/_{3}$."

361*a*. **शुक्लकृष्णगती** Nom. dual of the fem. comp. noun Śuklakṛṣṇagati (White and black ways of departure) **8**. $26/_{1}$.

**स**

377*a*. **संप्रदर्शितः** Nom. sing. of the mas. form of the past pass. participial adj. Sampradarśita (Shown or exposed to view).

The total number of words carried over from App. II to Section B thus comes to 441 by the addition of 15 new words taken from the foot-notes as amended on comparing the Madras edition.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# PART II

## Section A

## SECONDARY WORD-UNITS

A cursory glance at the Index of the Primary Word-Units will show that there are amongst those units several which are compound words made up of two or more component parts consisting of simple or compound words. Most of them do not at all occur as primary units in any portion of the Bhagavadgītā. They have however an importance from the linguistic point of view. It is therefore proposed to give in this part an Alphabetical Index of all the secondary units which go to make up the compound primary units indexed in Part I, together with the primary units themselves, and the method by which the compounds had been dissolved and the secondary units arrived at. Those words could not be incorporated in the Index of primary words because all the secondary units except the last in each compound are uninflected while all those in the said index are inflected words with the exception of the indeclineables and the case-terminations regarded as understood vary though the units remain the same in most cases. The places in the work where the primary units occur have not been repeated in this chapter for the sake of economy of paper. In order to ascertain them reference must be made to Part I. Similarly the meanings of the secondary units have not been given in this part except in rare cases, because they are easily ascertainable from those of the Primary Word-Units in Part I.

### *Sub-section (a)—Vulgate with Variants*

### अ

1. **अ**—अकारः—'अ' इति रवः क्रियते यस्योच्चारणे सः वर्णविशेषः।
2. **अकार्य**—(१) कार्याकार्यव्यवस्थितौ। (२) कार्याकार्ये।—(१) इदं कार्यं, इदं अकार्यं, (न कार्यं) इति व्यवस्थितिः कार्याकार्यव्यवस्थितिः, तस्यां कार्याकार्यव्यवस्थितौ। (२) कार्यं च अकार्यं (न कार्यं) कार्याकार्ये।
3. **अकीर्ति**—अकीर्तिकरम्—अकीर्तिम् [न कीर्तिः (अपकीर्तिः) अकीर्तिः; ताम्] यत्करोति तत् अकीर्तिकरम्।
4. **अक्ष**—कमलपत्राक्ष—कमलपत्रं (कमलस्य पत्रं) इव अक्षे यस्य सः कमलपत्राक्षः। संबोधने विसर्गलोपः।
5. **अक्षर**—(१) अक्षरसमुद्भवम्। (२) एकाक्षरम्।—(१) अक्षरात् (न क्षरतीति अक्षरः, तस्मात्) समुद्भवः यस्य तत् अक्षरसमुद्भवः, तम् अक्षरसमुद्भवम्। (२) एक एव अक्षरः यस्य वाचकः तत् एकाक्षरम्, तम् एकाक्षरम्।
6. **अक्षिशिरोमुख**—सर्वतोऽक्षिशिरोमुखम्—सर्वतः अक्षिशिरोमुखः (अक्षीणि शिरांसि मुखानि च यस्य सः) सर्वतोऽक्षिशिरोमुखः, तम्।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



7. **अग्नि**—(१)आत्मसंयमयोगाग्नौ। (२) इन्द्रियाग्निषु। (३) ज्ञानाग्निः। (४) निरग्निः। (५) ब्रह्माग्नौ। (६) संयमाग्निषु।—(१) आत्मसंयमयोगः [आत्मसंयमः (आत्मनः संयमः) एव योगः] एव अग्निः आत्मसंयमयोगाग्निः, तस्मिन् आत्मसंयमयोगाग्नौ। (२) इन्द्रियाण्येव अग्नयः इन्द्रियाग्नयः, तेषु इन्द्रियाग्निषु। (३) ज्ञानं एव अग्निः ज्ञानाग्निः। (४) निर्गताः अग्नयः यस्य गृहात् स निरग्निः। (५) ब्रह्म एव अग्निः ब्रह्माग्निः, तस्मिन् ब्रह्माग्नौ। (६) (इन्द्रियाणां) संयमाः एव अग्नयः संयमाग्नयः, तेषु संयमाग्निषु।

8. **अग्र**—(१) एकाग्रम्। (२) एकाग्रेण। (३) नासिकाग्रम्।—(१-२) एकः एव अग्रे यस्य तत् एकाग्रम्; तेन एकाग्रेण। (३) नासिकायाः अग्रम् नासिकाग्रम्, तम् नासिकाग्रम्।

9. **अघ**—(१) अघायुः। (२) अनघ।—(१) अघं (पापमयं) आयुः यस्य सः अघायुः। (२) न विद्यते अघं (पापं) यस्मिन् सः अनघः; संबोधने विसर्गलोपः।

10. **अङ्ग**—उत्तमाङ्गैः—उत्तमानि अङ्गानि उत्तमाङ्गानि (शिरांसि) तैः।

11. **अचर**—(१) चराचरम्। (२) चराचरस्य। (३) सचराचरम्।—(१-२) चरं च अचरं (न चरं) च चराचरम्; तस्य चराचरस्य। (३) चरं च अचरं (न चरं) च तयोः सहितं सचराचरम्।

12. **अचल**—अचलप्रतिष्ठम्—अचला (न चला) प्रतिष्ठा यस्य सः अचलप्रतिष्ठः, तम्।

13. **अचिन्त्य**—अचिन्त्यरूपम्—अचिन्त्यं (न चिन्त्यं) रूपं यस्य सः अचिन्त्यरूपः, तम्।

14. **अजय**—जयाजयौ—जयः च अजयः (न जयः) च।

15. **अजिन**—(१) चैलाजिनकुशोत्तरम्। (२) चैलाजिनकुशोत्तरम्।—(१-२) चेलं चैलं वा अजिनं कुशाश्च उत्तरोत्तरं यस्मिन् (आसने) तत् (आसनं) चैलाजिनकुशोत्तरम्, तम्।

16. **अज्ञान**—(१) अज्ञानजम्। (२) अज्ञानविमोहिताः। (३) अज्ञानसम्भूतम्। (४) अज्ञान-सम्मोहः।—(१) अज्ञानाज्जातम् अज्ञानजम्, तम् अज्ञानजम्। (२) अज्ञानेन विमोहिताः अज्ञानविमोहिताः। (३) अज्ञानात्सम्भूतम् अज्ञानसम्भूतम्, तम् अज्ञानसम्भूतम्। (४) अज्ञानाज्जातः सम्मोहः अज्ञानसम्मोहः।

17. **अञ्जलि**—कृताञ्जलिः—कृता अञ्जलिः येन सः।

18. **अति**—(१) अतिनीचम्। (२) अतिस्वप्नशीलस्य। (३) अतीतः। (४) अतीन्द्रियम्। (५) अत्यद्भुतम्। (६) अत्यन्तम्। (७) अत्यर्थम्। (८) अत्यश्नतः। (९) अत्युच्छ्रितम्।—(१) अतिशयेन नीचम् अतिनीचम्। (२) अतिशयेन स्वप्नशीलः (स्वप्नं शीलं यस्य सः) अतिस्वप्नशीलः, तस्य अतिस्वप्नशीलस्य। (३) अतिक्रम्य ईतः अतीतः। (४) इन्द्रियाणि अतिक्रम्य यद्वर्तते तत् अतीन्द्रियम्। (५) अतिशयेन अद्भुतम् अत्यद्भुतम्। (६) अन्तमतिक्रम्य यद्वर्तते तत् अत्यन्तम्। (७) अतिक्रम्य अर्थम् अत्यर्थम्। (८) अतिशयमश्नातीति अत्यश्नत्, तस्य अत्यश्नतः। (९) अतिशयेन उच्छ्रितम् अत्युच्छ्रितम्।

19. **अतिमानिता**—नातिमानिता—अतिमानितायाः अभावः।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



20. **अतीत**—(१) गुणातीतः। (२) द्वन्द्वातीतः।—(१) गुणानतीतः (अतिक्रम्य इतः) गुणातीतः। (२) द्वन्द्वान् (रागद्वेषौ, सुखदुःखे इत्यादीन्) अतीतः द्वन्द्वातीतः।

21. **अत्या**—दुरत्यया—दुःखेन अत्या दुरत्या, तथा।

22. **अत्युष्ण**—कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः।—कटवः, अम्लाः, लवणाः, अत्युष्णाः, तीक्ष्णाः, रूक्षाः, विदाहिनश्च (आहाराः)।

23. **अद्भुत**—अत्यद्भुतम्—[विग्रहपद्धत्यै 'अति' (५) शब्दो द्रष्टव्यः]।

24. **अद्भुतदर्शन**—अनेकाद्भुतदर्शनम्—अनेकानि अद्भुतदर्शनानि (अद्भुतानि दर्शनानि) यस्य सः अनेकाद्भुतदर्शनः, तम्।

25. **अधम**—(१) नराधमान्। (२) नराधमाः।—(१-२) नरेषु नराणां वा अधमाः नराधमाः, तान् नराधमान्।

26. **अधर्म**—अधर्माभिभवात्—अधर्मस्य (न धर्मः अधर्मः, तस्य) अभिभवः अधर्माभिभवः, तस्मात्।

27. **अधस्**—अधःशाखम्—अधः प्रसृताः यस्य शाखाः सः अधः शाखः, तम्।

28. **अधि**—(१) अधिदैवतम्। (२) अधिदैवम्। (३) अधिभूतम्। (४) अधियज्ञः। (५) अध्यात्मम्।—(१-२) देवताम् दैवम् वा अधिकृत्य तिष्ठतीति अधिदैवतम् अधिदैवम् वा। (३) भूतानि अधिकृत्य तिष्ठतीति अधिभूतम्। (४) यज्ञान् अधिकृत्य तिष्ठतीति अधियज्ञः। (५) आत्मनि इति, आत्मानं (देहं) अधिकृत्य तिष्ठतीति वा, अध्यात्मम्।

29. **अधिदैव**—साधिभूताधिदैवम्—अधिभूतेन (भूतानि अधिकृत्य तिष्ठतीति अधिभूतम्, तेन) अधिदैवेन (दैवमधिकृत्य तिष्ठतीति अधिदैवम्, तेन) च सहितः साधिभूताधिदैवः; तम्।

30. **अधिप**—(१) जनाधिपाः। (२) नराधिपम्।—(१) जनानां अधिपाः (अधिपातीति अधिपः; अधिपाः इति बहुवचनम्) जनाधिपाः। (२) नराणां अधिपः (अधिपातीति) नराधिपः, तं नराधिपम्।

31. **अधिभूत**—साधिभूताधिदैवम्—(विग्रहपद्धत्यै 'अधिदैव' शब्दो द्रष्टव्यः)।

32. **अधियज्ञ**—साधियज्ञम्—अधियज्ञेन (यज्ञान् अधिकृत्य तिष्ठतीति अधियज्ञः, तेन) सहितः साधियज्ञः तम्।

33. **अध्यात्म**—(१) अध्यात्मचेतसा। (२) अध्यात्मनित्याः। (३) अध्यात्मविद्या। (४) अध्यात्मसंज्ञितम्।—(१) अध्यात्मं (आत्मनि इति) चेतस् अध्यात्मचेतस्, तेन अध्यात्मचेतसा। (२) अध्यात्मं (आत्मनि) नित्याः (अहोनिशं लग्नाः) अध्यात्मनित्याः। (३) आत्मनि तात्पर्यं यस्याः सा विद्या अध्यात्मविद्या। (४) 'अध्यात्म' इति संज्ञा यस्य भवति तत् अध्यात्मसंज्ञितम्, तम् अध्यात्मसंज्ञितम्।

34. **अध्यात्मज्ञान**—अध्यात्मज्ञाननित्यत्वम्।—अध्यात्मज्ञानस्य (आत्मविषयकं ज्ञानम् अध्यात्मज्ञानम्, तस्य) नित्यत्वम्।

35. **अनन्त**—(१) अनन्तबाहुम्। (२) अनन्तरूप। (३) अनन्तरूपम्। (४) अनन्तविजयम्। (५) अनन्तवीर्य। (६) अनन्तवीर्यम्।—(१) अनन्ताः (न विद्यते अन्तः येषां ते)



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बाहवः यस्य सः अनन्तबाहुः, तम्। (२-३) अनन्तानि (न विद्यते अन्तः येषां तानि) रूपाणि यस्य सः अनन्तरूपः, तम् अनन्तरूपम्; संबोधने च विसर्गलोपः। (४) अनन्तः (न विद्यते अन्तः यस्य सः) विजयः यस्य सः अनन्तविजयः, तम् अनन्तविजयम्। (५-६) अनन्तं (न विद्यते अन्तः यस्य तम्) वीर्यं यस्य सः अनन्तवीर्यः, तम् अनन्तवीर्यम्; संबोधने च विसर्गलोपः।

36. **अनन्तर**—तदनन्तरम्—तस्मात् अनन्तरम् (अन्तरं विना)।

37. **अनन्तरूप**—सर्वतोऽनन्तरूपम्—सर्वतः (सर्वासु दिक्षु) अनन्तरूपः अनन्तानि (न विद्यते अन्तः येषां तानि) रूपाणि यस्य सः सर्वतोऽनन्तरूपः, तम्।

38. **अनन्य**—अनन्ययोगेन—अनन्यः (न विद्यते अन्यः अन्यः यस्मिन् सः) योगः अनन्ययोगः, तेन।

39. **अनिष्ट**—इष्टानिष्टोपपत्तिषु—इष्टा च अनिष्टा (न इष्टा) च उपपत्तयः इष्टानिष्टोपपत्तयः, तासु।

40. **अनीक**—(१) पाण्डवानीकम्। (२) प्रत्यनीकेषु।—(१) पाण्डवानां अनीकं (सैन्यं) पाण्डवानीकम्; तम् पाण्डवानीकम्। (२) अनीकं अनीकं प्रत्यनीकम्; तस्य बहवः प्रत्यनीकानि, तेषु प्रत्यनीकेषु।

41. **अनुकम्पा**—अनुकम्पार्थम्—अनुकम्पायै इदमिति।

42. **अनुग्रह**—मदनुग्रहाय—मम (मयि) अनुग्रहः मदनुग्रहः, तस्मै।

43. **अनुदर्शन**— जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम्।— जन्ममृत्युजराव्याधिदुःखदोषस्य [जन्म...व्याधिदुःखानि (जन्म.. व्याधयः एव दुःखानि) एव दोषः जन्म...दुःखदोषः, तस्य] अनुदर्शनम्। श्रीशङ्करमते वैकल्पिको विग्रहस्तु—जन्म...च व्याधयश्च दुःखानि च तेषु दोषस्य अनुदर्शनम्।

44. **अनुद्विग्न**—अनुद्विग्नमनाः—अनुद्विग्नं (न उद्विग्नं) मनः यस्य सः।

45. **अनुबन्ध**—कर्मानुबन्धीनि—कर्मभिः अनुबन्धीनि।

46. **अनुभाव**—महानुभावान्—महाननुभावः येषां ते महानुभावाः, तान्।

47. **अनुरूप**—सत्त्वानुरूपा—सत्त्वस्य, सत्त्वं, वा अनुरूपा (यस्याः रूपं सत्त्वस्य रूपं अनुसरति)।

48. **अनुलेपन**—दिव्यगन्धानुलेपनम्—दिव्यगन्धेन (दिव्यः गन्धः दिव्यगन्धः, तेन) अनुलेपनं येन कृतं (स्वशरीरे) सः दिव्यगन्धानुलेपनः, तम्।

49. **अनुष्ठित**—स्वनुष्ठितात्—सुष्ठु अनुष्ठितम् स्वनुष्ठितम्, तस्मात्।

50. **अनेक**—(१) अनेकदिव्याभरणम्। (२) अनेकबाहूदरवक्त्रनेत्रम्। (३) अनेकवक्त्रनयनम्। (४) अनेकवर्णम्। (५) अनेकाद्भुतदर्शनम्। (६) दिव्यानेकोद्यतायुधम्।—(१) अनेकानि (न एकम् अनेकम्, तस्य बहूनि) दिव्यानि आभरणानि यस्य (शरीरे) स अनेकदिव्याभरणः, तम् अनेकदिव्याभरणम्। (२) अनेकानि (विग्रहः पूर्ववत्) बाहवः, उदराणि, वक्त्राणि नेत्रयुगलानि यस्य सः अनेकबाहूदरवक्त्रनेत्रः, तम् अनेक...वक्त्रनेत्रम्। (३) अनेकानि (विग्रहः पूर्ववत्) वक्त्राणि नयनयुगलानि यस्य



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सः अनेकवक्त्रनयनः, तम् अनेकवक्त्रनयनम्। (४) अनेकानि (विग्रहः पूर्ववत्) वर्णानि यस्य (शरीरस्य) सः अनेकवर्णः, तम् अनेकवर्णम्। (५) (विग्रहपद्धत्यै 'अद्भुतदर्शन' शब्दो द्रष्टव्यः)। (६) अनेकानि (विग्रहः प्रथमवत्) उद्यता-युधानि (उद्यतानि आयुधानि) यस्य सः दिव्यानेकोद्यतायुधः, तम् दिव्यानेकोद्य-तायुधम्।

51. **अनेकचित्त**—अनेकचित्तविभ्रान्ताः—अनेकैः (न एकम्, अनेकम्, तस्य बहूनि अनेकानि, तैः) चित्तैः (चित्तवृत्तिभिः, कल्पनाभिः वा) विभ्रान्ताः।

52. **अनेकजन्म**—अनेकजन्मसंसिद्धः—अनेकेषां (न एकम् अनेकम्, तस्य बहूनि अनेकानि, तेषां) जन्मनां अन्ते यः संसिद्धिं आप्नोति सः।

53. **अन्त**—(१) अत्यन्तम्। (२) अनन्त। (३) अनन्तम्। (४) अनन्तः। (५) अनन्ताः। (६) अन्तकाले। (७) अन्तगतम्। (८) आद्यन्तवन्तः। (९) एकान्तम्। (१०) कृतान्ते। (११) दुःखान्तम्। (१२) प्रलयान्ताम्। (१३) युगसहस्रान्ताम्।—(१) (विग्रहपद्धत्यै 'अति' (६) शब्दो द्रष्टव्यः)। (२–५) न अन्तः विद्यते यस्य, सः अनन्तः, तत् अनन्तम्; संबोधने प्रथमात् विसर्गलोपः; तदेव प्रथमाबहुवचने अनन्ताः। (६) अन्तस्य (मृत्योः) कालः अन्तकालः, तस्मिन् अन्तकाले। (७) अन्तं गतम् अन्तगतम्। (८) आदिः अन्तः च येषां भवतः ते आद्यन्तवन्तः। (९) एकः एव अन्तः यस्य तत् एकान्तम्। (१०) कृतस्य (कर्मणः) अन्तः यस्य परिशीलनात् भवति तत् (साङ्ख्यम्) कृतान्तम्, तस्मिन् कृतान्ते। (११) दुःखानां अन्तं दुःखान्तम्। (१२) प्रलये यस्याः अन्तः आगच्छति सा प्रलयान्ता, ताम् प्रलयान्ताम्। (१३) युगसहस्रैः (युगानां सहस्रैः) यस्याः अन्तः आगच्छति सा युगसहस्रान्ता, ताम् युगसहस्रान्ताम्।

54. **अन्तर**—(१) अनन्तरम्। (२) दशनान्तरेषु।—(१) अन्तरं विना अनन्तरम्। (२) दशनानां अन्तराणि दशनान्तराणि, तेषु दशनान्तरेषु।

55. **अन्तरात्मन्**—प्रव्यथितान्तरात्मा—प्रव्यथितः अन्तरात्मा [अन्तः (हृदये) यः स्थितः स आत्मा) यस्य सः।

56. **अन्तर्**—(१) अन्तरात्मना। (२) अन्तरारामः। (३) अन्तर्ज्योतिः। (४) अन्तःशरीर-स्थम्। (५) अन्तःसुखः। (६) अन्तःस्थानि।—(१) अन्तः (हृदये) यः स्थितः स आत्मा अन्तरात्मा, तेन अन्तरात्मना। (२) अन्तः (हृदये) यः आरामं (विश्रान्तिं) अनुभवति सः अन्तरारामः। (३) अन्तः (हृदये) यस्य ज्योतिः (प्रकाशः) प्रकटिता आविर्भूता वा सः अन्तर्ज्योतिः। (४) शरीरस्य अन्तर्यः स्थितः सः अन्तःशरीरस्थः, तम् अन्तःशरीरस्थम्। (५) अन्तः (हृदये) यः सुखं अनुभवति सः अन्तःसुखः। (६) अन्तः (हृदये) स्थितानि अन्तःस्थानि।

57. **अन्न**—अन्नसम्भवः—अन्नस्य सम्भवः (उत्पत्तिः)।

58. **अन्य**—(१) अनन्यया। (२) अनन्येन। (३) अनन्याः। (४) अन्यदेवताः। (५) त्वदन्यः। (६) त्वदन्येन।—(१–३) न अन्यः लक्ष्यः विद्यते यस्याः सा अनन्या, तया



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अनन्यया; न विद्यते......सः अनन्यः, तेन अनन्येन; अनन्याः इति प्रथमाबहुवचनम्। (४) देवतानां अन्याः अन्यदेवताः। (५-६) तुभ्यमन्यः त्वदन्यः, तेन त्वदन्येन।

59. **अन्यगामिन्**—नान्यगामिना—न अन्यगामिन् (अन्यं प्रति यत् गच्छति तत्) नान्यगामिन्, तेन।

60. **अन्यचेतस्**—अनन्यचेताः—न, अन्यचेताः [अन्यः यस्य चेतसि विद्यते सः], अनन्यं (न अन्यस्मिन्गतं) चेतः यस्य वा।

61. **अन्यदेवता**—अन्यदेवताभक्ताः—अन्यदेवतानां (देवतानां अन्याः अन्यदेवताः, तेषां) भक्ताः।

62. **अन्यभाक्**—अनन्यभाक्—न अन्य भाक् (अन्यं भजति इति)।

63. **अन्यमनस्**—अनन्यमनसः—न अन्यमनसः (अन्यः येषां चेतःसु विद्यते ते)।

64. **अन्वित**—(१) कामरागबलान्विताः। (२) गुणान्वितम्। (३) दम्भमानमदान्विताः। (४) धनमानमदान्विताः। (५) हर्षशोकान्वितः।—(१) कामरागबलेन [(कामेषु रागः कामरागः) तस्य बलम् कामरागबलम्, तेन] अन्विताः। (२) गुणैः अन्वितम् गुणान्वितम्। (३) दम्भेन मानेन मदेन च अन्विताः दम्भमानमदान्विताः। (४) धनप्रयुक्ताभ्यां मानमदाभ्याम् (मानश्च मदश्च ताभ्याम्) अन्विताः धनमानमदान्विताः। (५) हर्षेण शोकेण वा अन्विताः हर्षशोकान्विताः।

65. **अपमान**—मानापमानयोः—मानश्च अपमानश्च मानापमानौ, तयोः।

66. **अपर**—अपरस्परसम्भूतम्—अपरः (न परः) परश्च तयोः सम्भूतम्।

67. **अपहृत**—(१) अपहृतचेतसाम्। (२) अपहृतज्ञानाः।—(१) अपहृतानि चेतांसि येषां ते अपहृतचेतसः, तेषाम् अपहृतचेतसाम्। (२) अपहृतं ज्ञानं येषां ते अपहृतज्ञानाः।

68. **अपान**—(१) प्राणापानगती। (२) प्राणापानसमायुक्तः। (३) प्राणापानौ।—(१) प्राणापानयोः (प्राणश्च अपानश्च प्राणापानौ, तयोः) गती प्राणापानगती। (२) प्राणापानाभ्याम् (प्राणश्च अपानश्च प्राणापानौ, ताभ्याम्) समायुक्तः प्राणापानसमायुक्तः। (३) [विग्रहपद्धत्यै अत्रैव (१) शब्दो दृष्टव्यः]।

69. **अपाय**—आगमापायिनः—आगमश्च असौ अपायश्च आगमापायौ, तद्वन्तः, तच्छीलाः वा।

70. **अपि**—तथापि—तथा सति अपि।

71. **अपेक्षा√ईक्ष् + अप**—अनपेक्षः—अपेक्षां यो न सेवते करोति वा सः।

72. **अपेक्ष्य√ईक्ष् + अप**—अनपेक्ष्य—अपेक्षां न सेवन् कुर्वन् वा।

73. **अप्यय**—भवाप्ययौ—भवश्च असौ अप्ययश्च (सर्गविसर्गौ)।

74. **अप्रतिम**—अप्रतिमप्रभावः—अप्रतिमः (न प्रतिमा विद्यते अस्य इति) प्रभावः यस्य सः।

75. **अप्रिय**—तुल्यप्रियाप्रियः—तुल्ये प्रियं अप्रियं (न प्रियं) च यस्य दृष्ट्या सः।

76. **अभय**—भयाभये—भयं च अभयं (भयस्य अभावः) च।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



77. **अभिक्रम √क्रम + अभि**—अभिक्रमनाशः—अभिक्रमस्य नाशः ।

78. **अभिभव √भू (भव्) + अभि**—अधर्माभिभवात्—(विग्रहपद्धत्यै 'अधर्म' शब्दो द्रष्टव्यः)।

79. **अभियुक्त √युज् + अभि**—नित्याभियुक्तानाम्—नित्यं ये अभियुक्ताः ते नित्याभियुक्ताः, तेषाम् ।

80. **अभिरक्षित √रक्ष् + अभि**—(१) भीमाभिरक्षितम् । (२) भीष्माभिरक्षितम् ।—(१) भीमेन अभिरक्षितम् । (२) भीष्मेन अभिरक्षितम् ।

81. **अभिष्वङ्ग**—अनभिष्वङ्गः—अभिष्वङ्गस्य अभावः ।

82. **अभिसंधाय √धा + सम्** and **अभि**—अनभिसंधाय—न अभिसंधाय ।

83. **अभिस्नेह**—अनभिस्नेहः—अभिस्नेहस्य अभावः ।

84. **अभ्यन्तर**—नासाभ्यन्तरचारिणौ—नासायाः अभ्यन्तरं यौ चरतः तौ ।

85. **अभ्यसन**—स्वाध्यायाभ्यसनम्—स्वाध्यायस्य (वेदस्य) अभ्यसनम् ।

86. **अभ्यास**—(१) अभ्यासयोगेन । (२) पूर्वाभ्यासेन ।—(१) अभ्यासः (योगविशिष्टः) एव, अभ्यासेन वा, योगः अभ्यासयोगः, तेन अभ्यासयोगेन । (२) पूर्व(पूर्वजन्मनि) कृतः अभ्यासः पूर्वाभ्यासः, तेन पूर्वाभ्यासेन ।

87. **अभ्यासयोग**—अभ्यासयोगयुक्तेन—अभ्यासयोगेन [विग्रहपद्धत्यै 'अभ्यास' (१) शब्दो द्रष्टव्यः] युक्तः अभ्यासयोगयुक्तः, तेन ।

88. **अभ्र**—छिन्नाभ्रम्—छिन्नं अभ्रम् ।

89. **अमर्ष**—हर्षामर्षभयोद्वेगैः—हर्षामर्षभयैः (हर्षश्च अमर्षश्च भयं च हर्षामर्षभयानि, तैः) कृताः उद्वेगाः हर्षामर्षभयोद्वेगाः, तैः ।

90. **अमित**—अमितविक्रमः—अमितः (न मितः) विक्रमः यस्य सः ।

91. **अमृत** (Nectar)—(१) अमृतोद्भवम् । (२) अमृतोपमम् । (३) धर्म्यामृतम् ।—(१) अमृतात् (समुद्रात्) उद्भवः यस्य सः अमृतोद्भवः, तम् अमृतोद्भवम् । (२) अमृतेन (मृत्युं वारयति अपहरति वा इति अमृतम्, तेन) यत् उपमीयते तत् अमृतोपमम् । (३) धर्म्यं च तत् अमृतं च धर्म्यामृतम् ।

92. **अम्बु**—अम्बुवेगाः—अम्बूनां वेगाः ।

93. **अम्ल**—कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः ।—(विग्रहपद्धत्यै 'अत्युष्ण' शब्दो द्रष्टव्यः ।)

94. **अंश**—एकांशेन—एक एव अंशः एकांशः, तेन ।

95. **अयन**—(१) उत्तरायणम् । (२) दक्षिणायनम् ।—(१) उत्तरे स्थितं अयनम् (मार्गः) उत्तरायणम् । (२) दक्षिणे स्थितं अयनम् दक्षिणायनम् ।

96. **अरि**—(१) अरिसूदन । (२) मित्रारिपक्षयोः । (३) सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु ।—(१) अरीणां सूदनः (संहर्ता) अरिसूदनः; संबोधने विसर्गलोपः । (२) मित्रस्य पक्षः अरेश्च पक्ष मित्रारिपक्षौ, तयोः मित्रारिपक्षयोः । (३) सुहृदश्च



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मित्राणि च अरयश्च उदासीनाश्च मध्यस्थाश्च द्वेष्याश्च बन्धवश्च सुहृन्मित्रार्युदासीन-मध्यस्थद्वेष्यबन्धवः, तेषु सुहृन्मित्रार्युदासीन...बन्धुषु ।

97. **अर्जुन**—(१) केशवार्जुनयोः । (२) भीमार्जुनसमाः ।—( १ ) केशवश्च असौ अर्जुनश्च केशवार्जुनौ, तयोः केशवार्जुनयोः । ( २ ) भीमश्च असौ अर्जुनश्च तयोः (एकतरस्य) समाः भीमार्जुनसमाः ।

98. **अर्थ**—(१) अत्यर्थम् । (२) अनुकम्पार्थम् । (३) अर्थकामान् । (४) अर्थव्यपाश्रयः । (५) अर्थसंचयान् । (६) अर्थार्थी । (७) अवहासार्थम् । (८) इन्द्रियार्थान् । (९) इन्द्रियार्थेभ्यः । (१०) इन्द्रियार्थेषु । (११) उत्सादनार्थम् । (१२) कामभोगार्थम् । (१३) तदर्थम् । (१४) दम्भार्थम् । (१५) धर्मकामार्थान् । (१६) प्रत्युपकारार्थम् । (१७) मदर्थम् । (१८) मदर्थे । (१९) यज्ञार्थात् । (२०) संज्ञार्थम् । (२१) सत्कार-मानपूजार्थम् । (२२) सर्वार्थान् ।—(१-२) [विग्रहपद्धतिभ्यां 'अति' (७), 'अनु-कम्पा' शब्दौ क्रमेण द्रष्टव्यौ] । ( ३ ) अर्थान् कामयन्ति इति अर्थकामाः, तान् अर्थकामान् । ( ४ ) अर्थानां व्यपाश्रयः अर्थव्यपाश्रयः । ( ५ ) अर्थानां संचयाः अर्थसंचयाः, तान् अर्थसंचयान् । ( ६ ) अर्थानां अर्थी अर्थार्थी । ( ७ ) अवहासाय इदं इति अवहासार्थम् । ( ८-१० ) इन्द्रियाणां अर्थाः इन्द्रियार्थाः, तान् इन्द्रियार्थान्; तेभ्यः इन्द्रियार्थेभ्यः; तेषु इन्द्रियार्थेषु । ( ११ ) उत्सादनाय इदं इति उत्सादनार्थम् । ( १२ ) कामभोगाय (कामानां भोगः कामभोगः तस्मैः) इदं इति कामभोगार्थम् । ( १३ ) तस्मै इदं इति तदर्थम् । ( १४ ) दम्भाय इदं इति दम्भार्थम् । ( १५ ) धर्मश्च असौ कामश्च असौ अर्थश्च धर्मकामार्थाः, तान् धर्मकामार्थान् । ( १६ ) प्रत्युपकाराय इदं इति प्रत्युपकारार्थम् । ( १७-१८ ) मह्यं इदं इति मदर्थम् , मदर्थे वा । ( १९ ) यज्ञाय इदं इति यज्ञार्थम् , तस्मात् यज्ञार्थात् । ( २० ) संज्ञायै इदं इति संज्ञार्थम् । ( २१ ) सत्कारमानपूजाभ्यः (सत्कारश्च मानश्च पूजा च सत्कार-मानपूजा, ताभ्यः) इदं इति सत्कारमानपूजार्थम् । ( २२ ) सर्वाः अर्थाः (पदार्थाः, इन्द्रियविषयाः वा) सर्वार्थाः, तान् सर्वार्थान् ।

99. **अर्थिन्**—अर्थार्थी—[विग्रहपद्धत्यै 'अर्थ' (६) शब्दो द्रष्टव्यः] ।

100. **अर्थीय**—तदर्थीयम्—तस्मै (तत्प्राप्त्यै तदर्थे वा) यत्कृतम् तत् ।

101. **अर्दन**—जनार्दन—जनानां अर्दनः जनार्दनः; संबोधने विसर्गलोपः ।

102. **अर्पण**—मदर्पणम्—मह्यं अर्पणम् ।

103. **अर्पित**—मय्यर्पितमनोबुद्धिः—मयि अर्पिते मनोबुद्धी (मनश्च बुद्धिश्च) येन सः ।

104. **अर्ह**—पूजार्हौ—पूजां अर्हतः इति ।

105. **अलाभ**—लाभालाभौ—लाभश्च असौ अलाभः (लाभस्य अभावः) च ।

106. **अल्प**—(१) अल्पबुद्धयः (२) अल्पमेधसाम् (३) स्वल्पम् ।—( १ ) अल्पा बुद्धिः येषां ते अल्पबुद्धयः ( २ ) अल्पा मेधा येषां ते अल्पमेधसः, तेषां अल्पमेधसाम् । ( ३ ) सुतरां अल्पम् स्वल्पम् ।

107. **अवगम**—प्रत्यक्षावगमम्—प्रत्यक्षं अवगमः यस्य भवति तत् ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



108. **अवनिपाल**—अवनिपालसङ्घैः—अवनिपालानां (अवनिं पालयन्ति इति अवनिपालाः, तेषाम्) सङ्घाः अवनिपालसङ्घाः, तैः ।

109. **अवमान**—मानावमानयोः—मानश्च अवमानश्च तयोः ।

110. **अवलोकयन्√लोक् + अव**—अनवलोकयन्—न अवलोकयन् ।

111. **अवस्थित√स्था + अव**—ज्ञानावस्थितचेतसः—ज्ञाने ज्ञानेन वा अवस्थितं चेतः यस्य सः ज्ञानावस्थित चेताः तस्य ।

112. **अवहास**—अवहासार्थम्—(विग्रहपद्धत्यै 'अर्थ' (१) शब्दो द्रष्टव्यः) ।

113. **अवाप्त√आप् with अव**—अनवाप्तम्—न अवाप्तम् ।

114. **अविरुद्ध**—धर्माविरुद्धः—धर्मात् अविरुद्धः (न विरुद्धः) ।

115. **अव्यक्त**—(१) अव्यक्तनिधनानि । (२) अव्यक्तमूर्तिना । (३) अव्यक्तसंज्ञके । (४) अव्यक्तादीनि । (५) अव्यक्तासक्तचेतसाम् ।—(१) अव्यक्तं निधनं येषां तानि अव्यक्तनिधनानि । (२) अव्यक्ता, अव्यक्ता, वा, मूर्तिः यस्य स अव्यक्तमूर्तिः, तेन अव्यक्तमूर्तिना । (३) अव्यक्तं यस्य संज्ञा भवति सः अव्यक्तसंज्ञकः, तस्मिन् अव्यक्तसंज्ञके । (४) अव्यक्तं आदिः येषां तानि अव्यक्तादीनि । (५) अव्यक्ते आसक्तानि चेतांसि येषां ते अव्यक्तासक्तचेतसः, तेषां अव्यक्तासक्तचेतसाम् ।

116. **अव्यय**—अव्ययात्मा—अव्ययः (न व्ययशीलः) आत्मा यस्य सः ।

117. **अशन**—महाशनः—महान् अशनः (अशनशीलः) ।

118. **अशिन्√अश्**—(१) यज्ञशिष्टाशिनः । (२) लघ्वाशी ।—(१) यज्ञशिष्टं (यज्ञे यत् शिष्टं तत्) ये अश्नन्ति ते यज्ञशिष्टाशिनः । (२) लघु (अल्पं) यः अश्नाति सः लघ्वाशी ।

119. **अशुचि**—अशुचिव्रताः—अशुचीनि व्रतानि ये अनुतिष्ठन्ति ते ।

120. **अशुभ**—शुभाशुभम्—शुभं च अशुभं च तयोः समाहारः ।

121. **अश्नत्√अश्**—(१) अत्यश्नतः (२) अनश्नतः ।—(१) [ विग्रहपद्धत्यै 'अति' (८) शब्दो द्रष्टव्यः ] । (२) न किमपि यः अश्नाति सः अनश्नन्, तस्य अनश्नतः ।

122. **अश्रुपूर्ण**—अश्रुपूर्णाकुलेक्षणम्—अश्रुपूर्णं (अश्रुभिः पूर्णम्) आकुलं च ईक्षणं यस्य सः अश्रुपूर्णाकुलेक्षणः, तम् ।

123. **अष्ट**—अष्टधा—अष्टभिः प्रकारैः ।

124. **असक्त**—(१) असक्तबुद्धिः । (२) असक्तात्मा ।—(१) असक्ता (न सक्ता) बुद्धिः यस्य सः असक्तबुद्धिः (२) असक्तः (न सक्तः) आत्मा (अन्तःकरणं) यस्य सः असक्तात्मा ।

125. **असङ्ग**—असङ्गशस्त्रेण—असङ्गः [ न सङ्गः (सङ्गविवर्जनम्) ] एव शस्त्रं असङ्गशस्त्रम्, तेन ।

126. **असत्**—सदसत्—सत् च असत् (न सत्) च ।

127. **असि**—ज्ञानासिना—ज्ञानं एव असिः ज्ञानासिः, तेन ।

128. **असिद्धि**—सिद्ध्यसिद्ध्योः—सिद्धिश्च असिद्धिः (न सिद्धिः, सिद्धेः अभावः) च सिद्ध्यसिद्धी, तयोः ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



129. **असु**—गतासून्—गताः असवः येषां ते गतासवः, तान् ।

130. **असुर**—गन्धर्वयक्षासुरसिद्धसङ्घाः—गन्धर्वाश्च यक्षाश्च असुराश्च सिद्धाश्च एतेषां सङ्घाः ।

131. **असूयत्√असूय्**—अनसूयन्तः—न असूयन्तः ।

132. **असूया**—अनसूयः—असूयां यः न करोति सः ।

133. **असुयु**—अनसूयवे—न असूयुः अनसूयुः, तस्मै ।

134. **अस्** (To be)—(१) गन्तासि । (२) जेतासि ।—( १ ) गन्तृ भविष्यसि । ( २ ) जेतृ भविष्यसि ।

135. **अस्मद्**—अहंकृतः ।—अहम् इति संविदा कृतः (जनितः) भावः ।

136. **अहङ्कार**—(१) अनहङ्कारः । (२) अहंकारविमूढात्मा । (३) दम्भाहङ्कारसंयुक्ताः । (४) निरहङ्कारः । (५) साहङ्कारेण ।—( १ ) न अहङ्कारः (अहङ्कारस्य अभावः) अनहङ्कारः । ( २ ) अहङ्कारेण विमूढः आत्मा यस्य सः अहङ्कारविमूढात्मा । ( ३ ) दम्भेन अहङ्कारेण च संयुक्ताः दम्भाहङ्कारसंयुक्ताः । ( ४ ) निर्गतः अहङ्कारः यस्मात् सः निरहङ्कारः । ( ५ ) अहङ्कारेण सहितः साहङ्कारः, तेन साहङ्कारेण ।

137. **अहन्**—अहरागमे—अह्नः आगमे ।

138. **अहंवादिन्**—अनहंवादी—न अहं वादी (अहं अहं इति यः पुनः पुनः वदति सः) ।

139. **अहोरात्रि**—अहोरात्रिविदः—अहश्च रात्रिश्च ते यः वेत्ति सः ।

## आ

140. **आकर**—कुसुमाकरः—कुसुमानां आकरः ।

141. **आकाङ्क्षिन्**—फलाकाङ्क्षी—फलं आकाङ्क्षति इति ।

142. **आकाश**—आकाशस्थितः—आकाशे स्थितः ।

143. **आकुल**—अश्रुपूर्णाकुलेक्षणम्—(विग्रहपद्धत्यै 'अश्रुपूर्ण' शब्दो द्रष्टव्यः) ।

144. **आकृति**—नानावर्णाकृतीनि—नाना वर्णाः आकृतयश्च येषां तानि ।

145. **आगत**—गतागतम्—गतं च आगतं च (गमनागमनम् ) ।

146. **आगम**—(१) अहरागमे । (२) आगमापायिनः । (३) रात्र्यागमे ।—( १-२ ) (विग्रहपद्धतिभ्यां 'अहन्', 'अपाय' शब्दौ क्रमेण द्रष्टव्यौ) । ( ३ ) रात्र्याः आगमः रात्र्यागमः, तस्मिन् रात्र्यागमे ।

147. **आचार**—(१) किमाचारः । (२) मिथ्याचारः ।—( १ ) कः (कीदृशः) आचारः अस्य इति किमाचारः । ( २ ) मिथ्या (पापः) आचारः यस्य सः मिथ्याचारः ।

148. **आचार्य**—आचार्योपासनम्—आचार्यस्य उपासनम् (सेवा, शुश्रुषा वा) ।

149. **आत्मक**—(१) परिचर्यात्मकम् । (२) रसात्मकः । (३) रागात्मकम् । (४) व्यवसायात्मिका । (५) हिंसात्मकः ।—( १ ) परिचर्या आत्मा (रूपं) यस्य तत् परिचर्यात्मकम् । ( २ ) रसः आत्मा (सत्त्वं) यस्य सः रसात्मकः । ( ३ ) रागः आत्मा (स्वभावः) यस्य तत् रागात्मकम् । ( ४ ) व्यवसायः आत्मा (जातिः प्रकारः वा) यस्याः सा व्यवसायात्मिका । ( ५ ) हिंसा आत्मा (स्वभावः) यस्य सः हिंसात्मकः ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



150. **आत्मन्**—(१) अध्यात्मम्। (२) अनात्मनः। (३) अन्तरात्मना। (४) अव्ययात्मा। (५) असक्तात्मा। (६) आत्मकारणात्। (७) आत्मतृप्तः (८) आत्मपरदेहेषु। (९) आत्ममायया। (१०) आत्मयोगात्। (११) आत्मरतिः। (१२) आत्मवश्यैः। (१३) आत्मविनिग्रहः। (१४) आत्मविभूतयः। (१५) आत्मविशुद्धये। (१६) आत्मशुद्धये। (१७) आत्मसंभाविताः। (१८) आत्मसंस्थम्। (१९) आत्मौपम्येन। (२०) कामात्मानः। (२१) जितात्मनः। (२२) जितात्मा। (२३) ज्ञानविज्ञानतृप्तात्मा। (२४) तदात्मानः। (२५) धर्मात्मा। (२६) नष्टात्मानः। (२७) नियतात्मभिः। (२८) परमात्मा। (२९) प्रयतात्मनः। (३०) प्रशान्तात्मा। (३१) प्रसन्नात्मा। (३२) ब्रह्मयोगयुक्तात्मा। (३३) महात्मनः। (३४) महात्मन्। (३५) महात्मा। (३६) महात्मानः। (३७) यतचित्तात्मा। (३८) यतात्मवान्। (३९) यतात्मा। (४०) यतात्मानः। (४१) युक्तात्मा। (४२) योगयुक्तात्मा। (४३) वश्यात्मना। (४४) विजितात्मनाम्। (४५) विजितात्मा। (४६) विदितात्मनाम्। (४७) विधेयात्मा। (४८) विमूढात्मा। (४९) विशुद्धात्मा। (५०) सन्न्यासयोगयुक्तात्मा। (५१) संशयात्मनः। (५२) संशयात्मा। (५३) सर्वभूतात्मभूतात्मा।—( १ ) [ विग्रहपद्धत्यै 'अधि' (५) शब्दो द्रष्टव्यः ]। ( २ ) न आत्मा अनात्मा, तस्य अनात्मनः। ( ३–५ ) [ विग्रहपद्धतिभ्यः 'अन्तर्' (१), 'अव्यय', 'असक्त' (२) शब्दाः क्रमेण द्रष्टव्याः]। ( ६ ) आत्मनः कारणम् आत्मकारणम्, तस्मात् आत्मकारणात्। ( ७ ) आत्मनि (हृदये) यः तृप्तः सः आत्मतृप्तः। ( ८ ) आत्मनः परेषां च देहाः आत्मपरदेहाः, तेषु आत्मपरदेहेषु। ( ९ ) आत्मनः (स्वस्य) माया आत्ममाया, तया आत्ममायया। ( १० ) आत्मनः (स्वस्य) योगः आत्मयोगः, तस्मात् आत्मयोगात्। ( ११ ) आत्मनि (स्वस्मिन्) रतिः यस्य सः आत्मरतिः। ( १२ ) आत्मानं वश्यानि आत्मवश्यानि, तैः आत्मवश्यैः। ( १३ ) आत्मनः (मनसः इन्द्रियाणां च) विनिग्रहः आत्मविनिग्रहः। ( १४ ) आत्मनः (स्वस्य) विभूतयः आत्मविभूतयः। ( १५ ) आत्मनः (स्वस्य अन्तःकरणस्य) विशुद्धिः आत्मविशुद्धिः, तस्यै आत्मविशुद्धये। ( १६ ) आत्मनः (स्वस्य अन्तःकरणस्य) शुद्धिः आत्मशुद्धिः, तस्यै आत्मशुद्धये। ( १७ ) आत्मना (स्वेन) एव संभाविताः आत्मसंभाविताः। ( १८ ) आत्मनि (हृदये) संस्थितम् आत्मसंस्थम्। ( १९ ) आत्मना औपम्यम् (उपमायाः भावः) आत्मौपम्यम्, तेन आत्मौपम्येन। ( २० ) कामः आत्मा (स्वभावः) येषां ते कामात्मानः। ( २१–२२ ) जितः आत्मा (स्वभावः), येन सः जितात्मा; तस्य जितात्मनः। ( २३ ) ज्ञानेन विज्ञानेन च तृप्तः आत्मा (हृदयं) यस्य सः ज्ञानविज्ञानतृप्तात्मा। ( २४ ) तदेव (तदभिन्नः) आत्मा (अन्तःकरणं) येषां ते तदात्मानः। ( २५ ) धर्मः एव आत्मा (स्वभावः) यस्य सः धर्मात्मा। ( २६ ) नष्टः आत्मा (विवेकबुद्धिः) येषां ते नष्टात्मानः। ( २७ ) नियतः आत्मा (स्वभावः, इन्द्रियसंघातः वा) यैः ते नियतात्मानः, तैः नियतात्मभिः। ( २८ ) परमः (सर्वश्रेष्ठः) आत्मा परमात्मा। ( २९ ) प्रयतः (प्रकर्षेण यतः, नियन्त्रितः) आत्मा (चित्तं स्वभावः वा) येन सः प्रयतात्मा, तस्य प्रयतात्मनः। ( ३० ) प्रशान्तः आत्मा (चित्तं स्वभावः वा) यस्य सः प्रशान्तात्मा। ( ३१ ) प्रसन्नः आत्मा (अन्तःकरणं) यस्य सः प्रसन्नात्मा। ( ३२ ) ब्रह्मयोगयुक्तः [ ब्रह्मयोगेन (ब्रह्मणः योगः



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ब्रह्मयोगः, तेन) युक्तः] आत्मा (अन्तःकरणं) यस्य सः ब्रह्मयोगयुक्तात्मा। (३३–३६) महान् आत्मा (अन्तःकरणं) यस्य सः महात्मा; महात्मनः इति षष्ठीएकवचनम्; महात्मन् इति संबोधनम्; महात्मानः इति प्रथमाबहुवचनम्। (३७) यतं चित्तं (अन्तःकरणं) आत्मा (बाह्यकरणं, इन्द्रियसंघातः वा) च येन सः यतचित्तात्मा। (३८) यतः आत्मा (इन्द्रियसंघातः) यतात्मा, तद्वान् यतात्मवान्। (३९–४०) यतात्मा (विग्रहः पूर्ववत्); यतात्मानः इति प्रथमाबहुवचनम्। (४१) युक्तः आत्मा (चित्तं इन्द्रियसंघातश्च) येन सः युक्तात्मा। (४२) योगेन योगे वा युक्तः, आत्मा (चित्तं इन्द्रियसंघातश्च) येन सः योगयुक्तात्मा। (४३) वश्यत्वं आपादितः आत्मा (चित्तं इन्द्रियसंघातश्च) येन सः वश्यात्मा, तेन वश्यात्मना। (४४–४५) विजितः आत्मा (चित्तं इन्द्रियसंघातश्च) येन सः विजितात्मा; विजितः......यैः ते विजितात्मनः, तेषां विजितात्मनाम्। (४६) विदितः आत्मा (स्वभावः, आत्मतत्त्वम् वा) यैः ते विदितात्मनः, तेषां विदितात्मनाम्। (४७) (इच्छातः) विधेयः आत्मा (अन्तःकरणं) यस्य सः विधेयात्मा। (४८) विमूढः (अज्ञानावृतः) आत्मा (अन्तःकरणं) यस्य सः विमूढात्मा। (४९) विशुद्धः (मलरहितः) आत्मा (अन्तःकरणं) यस्य सः विशुद्धात्मा। (५०) सन्न्यासयोगयुक्तः [सन्न्यासयोगेन (सन्न्यासः एव, सन्न्यासेन वा, योगः सन्न्यासयोगः, तेन) युक्तः सन्न्यासयोगयुक्तः] आत्मा (अन्तःकरणं बाह्यकरणं च) यस्य सः सन्न्यासयोगयुक्तात्मा। (५१–५२) संशययुक्तः आत्मा (चित्तं) यस्य सः संशयात्मा; तस्य संशयात्मनः। (५३) सर्वभूतात्मभूतः [सर्वभूतानां (सर्वेषां भूतानां) आत्मभूतः (आत्मा भूतः, आत्मत्वेन अवस्थितः)] आत्मा यस्य सः सर्वभूतात्मभूतात्मा।

('परिचयात्मकम्' इत्यादि पञ्च 'आत्मक' शब्दान्ताः समासाः अपि 'आत्मन्'-शब्दान्तर्गतत्त्वेन 'आत्मन्' शब्दसमासाः एव इति अवगन्तव्यम्।)

151. **आत्मबुद्धिप्रसाद्**—आत्मबुद्धिप्रसादजम्—आत्मबुद्धिप्रसादेन [आत्मबुद्ध्याः (आत्मनः बुद्धिः आत्मबुद्धिः; तस्याः) प्रसादः आत्मबुद्धिप्रसादः, तेन] जातम्।

152. **आत्मभाव**—आत्मभावस्थः—आत्मभावे (आत्मनः भावः आत्मभावः, स्वभावः, तस्मिन्) स्थितः।

153. **आत्मभूत**—सर्वभूतात्मभूतात्मा—[विग्रहपद्धत्यै 'आत्मन्' (५३) शब्दो द्रष्टव्यः]।

154. **आत्मसंयमयोग**—आत्मसंयमयोगाग्नौ—[विग्रहपद्धत्यै 'अग्नि' (१) शब्दो द्रष्टव्यः]।

155. **आत्मसंस्तुति**—तुल्यनिन्दात्मसंस्तुतिः—तुल्ये निन्दा आत्मसंस्तुतिः [आत्मनः, (स्वस्य) संस्तुतिः] च यस्य (मनसा) सः।

156. **आदि**—(१) अनादि। (२) अनादिम्। (३) अनादी। (४) अव्यक्तादीनि। (५) आदिकर्त्रे। (६) आदिदेवम्। (७) आदिदेवः। (८) आद्यन्तवन्तः। (९) कल्पादौ। (१०) जनकादयः। (११) पुत्रदारगृहादिषु। (१२) भूतादिम्। (१३) शब्दादीन्। (१४) श्रोत्रादीनि।—(१–३) न आदिः विद्यते यस्य सः अनादिः, तत् अनादि, तम् अनादिम्; अनादी इति प्रथमाद्विवचनम्। (४) [विग्रहपद्धत्यै 'अव्यक्त' (४) शब्दो द्रष्टव्यः]। (५) आदिः कर्ता आदिकर्ता, तस्मै आदिकर्त्रे।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



( ६–७ ) आदिः (प्रथमं आविर्भूतः) देवः आदिदेवः, तम् आदिदेवम्। ( ८ ) [विग्रहपद्धत्यै 'अन्त' (८) शब्दो द्रष्टव्यः]। ( ९ ) कल्पस्य आदिः कल्पादिः, तस्मिन् कल्पादौ। ( १० ) जनकः आदिः येषां ते जनकादयः। ( ११ ) पुत्राः दाराः गृहाणि च आदौ येषां तानि पुत्रदारगृहादीनि, तेषु पुत्रदारगृहादिषु। ( १२ ) भूतानां (सत्त्वानां) आदिः भूतादिः, तम् भूतादिम्। ( १३ ) शब्दः आदिः, आदौ वा, येषां ते शब्दादयः, तान् शब्दादीन्। ( १४ ) श्रोत्रं आदिः, आदौ वा, येषां तानि श्रोत्रादीनि।

157. **आदित्य**—(१) आदित्यगतम्। (२) आदित्यवर्णम्। (३) रुद्रादित्याः।—( १ ) आदित्ये गतम् (तदन्तः स्थितम्) आदित्यगतम्। ( २ ) आदित्यस्य इव वर्णः यस्य सः आदित्यवर्णः, तम् आदित्यवर्णम्। ( ३ ) (एकादश) रुद्राश्च (द्वादश) आदित्याश्च रुद्रादित्याः।

158. **आदित्व**—अनादित्वात्—न आदित्वम् अनादित्वम्, तस्मात्।

159. **आदिमत्**—अनादिमत्—आदिः अस्य विद्यते इति आदिमत्; न आदिमत् अनादिमत्।

160. **आदिमध्यान्त**—अनादिमध्यान्तम्—आदिश्च मध्यं च अन्तश्च आदिमध्यान्ताः, ते यस्य विद्यन्ते सः आदिमध्यान्तः, तम् आदिमध्यान्तम्; न आदिमध्यान्तम् अनादिमध्यान्तम्।

161. **आनन**—व्यात्ताननम्—व्यात्तं आननं यस्य सः व्यात्ताननः, तम्।

162. **आमय**—अनामयम्—न आमयः विद्यते यस्मिन् तत्।

163. **आयास**—बहुलायासम्—बहुलः आयासः बहुलायासः, तत्पूर्वकम्।

164. **आयुस्**—अघायुः—[विग्रहपद्धत्यै 'अघ' (१) शब्दो द्रष्टव्यः]।

165. **आयुःसत्त्वबलारोग्यसुखप्रीति**— आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः— आयुःसत्त्वबलारोग्यप्रीतिन् (आयुश्च सत्त्वं च बलं च आरोग्यं च प्रीतिश्च आयुःसत्त्व... प्रीतयः, ताः) विवर्धयन्ति इति।

166. **आ(रभ्य)**—(१) आब्रह्मभवनात्। (२) आब्रह्मभुवनात्।—( १–२ ) ब्रह्मभवनं,..भुवनं वा आरभ्य।

167. **आरम्भ**—(१) अनारम्भात्। (२) सर्वारम्भाः।—( १ ) न आरम्भः (तस्य अभावः) अनारम्भः, तस्मात् अनारम्भात्। ( २ ) सर्वे आरम्भाः सर्वारम्भाः।

168. **आराम**—(१) अन्तरारामः। (२) इन्द्रियारामः।—( १ ) [विग्रहपद्धत्यै 'अन्तर्' (२) शब्दो द्रष्टव्यः]। ( २ ) इन्द्रियेषु यः आरामं प्राप्नोति सः इन्द्रियारामः।

169. **आरूढ**—(१) यन्त्रारूढानि। (२) योगारूढस्य। (३) योगारूढः।—( १ ) यन्त्राणि (शरीराणि) आरूढानि (अधिष्ठितानि इव) यन्त्रारूढानि (इव सर्वभूतान्स्वमायया भ्रामयन्तिष्ठति हृद्देशे ईश्वरः)। ( २–३ ) योगं आरूढः (तस्य पारंगतः, तस्मिन् सिद्धिं प्राप्तः वा) योगारूढः, तस्य योगारूढस्य।

170. **आर्यजुष्ट**—अनार्यजुष्टम्—न आर्यजुष्टम् (आर्यस्य जुष्टम्)।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



171. **आलय**—(१) दुःखालयम्। (२) हिमालयः।—(१) दुःखानां आलयम् (नपुंसकलिङ्गम्) दुःखालयम्, तम् दुःखालयम्। (२) हिमस्य आलयः (पुंलिंगम्, हिमालयः।

172. **आलस्य**—(१) निद्रालस्यप्रमादोत्थम्। (२) प्रमादालस्यनिद्राभिः।—(१) निद्रायाः, आलस्यात्, प्रमादात् वा उत्थितम् निद्रालस्यप्रमादोत्थम्। (२) प्रमादश्च आलस्यं च निद्रा च प्रमालस्यनिद्राः, ताभिः प्रमादालस्यनिद्राभिः।

173. **आवर्तिन्**—पुनरावर्तिनः—पुनः ये आवर्तयन्ति (प्रत्यागच्छन्ति) ते।

174. **आवह**—भयावहः—भयं आवहति इति।

175. **आविष्ट √विश् + आ**—विस्मयाविष्टः—विस्मयेन आविष्टः।

176. **आवृत्ति**—अनावृत्तिम्—न आवृत्तिः (तस्याः अभावः) अनावृत्तिः, ताम्।

177. **आवेशित √विश् + आ**—मय्यावेशितचेतसाम्—मयि आवेशितानि चेतांसि, यैः, येषां वा, ते मय्यावेशितचेतसः, तेषाम्।

178. **आशा**—(१) निराशीः। (२) मोघाशाः—(१) निर्गताः आशाः यस्मात् सः निराशीः। (२) मोघाः (वृथा) आशाः येषां ते मोघाशाः।

179. **आशापाश**—आशापाशशतैः—आशापाशानां (आशाः एव पाशाः, आशानां पाशाः वा, आशापाशाः, तेषां) शताः आशापाशशताः, तैः आशापाशशतैः।

180. **आश्चर्य**—सर्वाश्चर्यमयम्—सर्वासु वस्तुषु सर्वतः वा आश्चर्यमयम् (आश्चर्ययुक्तम्)।

181. **आश्रय**—(१) निराश्रयः। (२) मदाश्रयः।—(१) निर्गतः आश्रयः यस्मात् (यः कस्याप्यश्रयो न गृह्णाति) सः निराश्रयः। (२) अहं आश्रयः यस्य सः मदाश्रयः।

182. **आश्रित**—अनाश्रितः—न कस्मिन्नपि आश्रितः।

183. **आसक्त**—(१) अव्यक्तासक्तचेतसाम्। (२) मय्यासक्तमनाः।—(१) [विग्रहपद्धत्यै 'अव्यक्त' (५) शब्दो द्रष्टव्यः]। (२) मयि आसक्तं मनः यस्य सः मय्यासक्तमनाः।

184. **आसङ्ग**—कर्मफलासङ्गम्—कर्मफलेषु (कर्मणां फलानि कर्मफलानि, तेषु) आसङ्गः कर्मफलासङ्गः, तम् कर्मफलासङ्गम्। श्रीशङ्करानुमतविग्रहस्तुः-कर्मणि तत्फले च असङ्गः कर्मफलासङ्गः, तम् कर्मफलासङ्गम्।

185. **आसद्**—दुरासदम्—दुःखेन आसादः (आसादनं प्राप्तिः वा) यस्य (भवति) सः दुरासदः, तम्।

186. **आसन**—विहारशय्यासनभोजनेषु—विहारश्च शय्या च आसनं च भोजनं च विहारशय्यासनभोजनानि, तेषु।

187. **आसुर**—आसुरनिश्चयान्—आसुराः (आसुरीप्रकृत्यनुरूपाः) निश्चयाः येषां ते आसुरनिश्चयाः, तान्।

188. **आहार**—(१) नियताहाराः। (२) निराहारस्य।—(१) नियताः आहाराः येषां ते नियताहाराः। (२) निर्गतः आहारः यस्मात् (यः न आहरति, उपभुङ्क्ते) सः निराहारः, तस्य निराहारस्य।

189. **आहारविहार**—युक्ताहारविहारस्य—युक्तौ आहारविहारौ (आहारश्च विहारश्च) यस्य सः युक्ताहारविहारः, तस्य।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## इ

190. **इच्छन्✓इच्छ्**—अनिच्छन्—न इच्छन्।

191. **इच्छाद्वेष**—इच्छाद्वेषसमुत्थेन—इच्छाद्वेषयोः (इच्छा च द्वेषश्च इच्छाद्वेषौ, तयोः) समुत्थितः इच्छाद्वेषसमुत्थितः, तेन।

192. **इच्छाभयक्रोध**—विगतेच्छाभयक्रोधः—विगताः इच्छाभयक्रोधाः (इच्छा च भयं च क्रोधश्च) यस्मात् सः।

193. **इज्या**—भूतेज्याः—भूतेषु (विनायकमातृकादिषु) इज्या (भक्तिः) येषां ते।

194. **इन्द्र**—(१) गजेन्द्राणाम्। (२) मृगेन्द्रः।—(१) गजानां इन्द्राः गजेन्द्राः (हस्तिविशेषाः); तेषां गजेन्द्राणाम्। (२) मृगाणां (वनपशूनां) इन्द्रः (राजा) मृगेन्द्रः (सिंहः)।

195. **इन्द्रिय**—(१) अतीन्द्रियम्। (२) इन्द्रियकर्माणि। (३) इन्द्रियगोचराः। (४) इन्द्रियग्रामम्। (५) इन्द्रियाग्निषु। (६) इन्द्रियारामः। (७) इन्द्रियार्थान्। (८) इन्द्रियार्थेभ्यः। (९) इन्द्रियार्थेषु। (१०) कर्मेन्द्रियाणि। (११) कर्मेन्द्रियैः। (१२) जितेन्द्रियः। (१३) मनःप्राणेन्द्रियक्रियाः। (१४) यतेन्द्रियमनोबुद्धिः। (१५) विजितेन्द्रियः। (१६) विषयेन्द्रियसंयोगात्। (१७) संयतेन्द्रियः।—(१) [विग्रहपद्धत्यै 'अति' (४) शब्दो द्रष्टव्यः]। (२) इन्द्रियाणां कर्माणि इन्द्रियकर्माणि। (३) इन्द्रियैः गोचराः (गम्याः) इन्द्रियगोचराः (पदार्थाः) (४) इन्द्रियाणां ग्रामः इन्द्रियग्रामः, तम् इन्द्रियग्रामम्। (५–९) [विग्रहपद्धतिभ्यः 'अग्नि' (२), 'आराम' (२), 'अर्थ' (८-१०) शब्दाः क्रमेण द्रष्टव्याः]। (१०–११) कर्माणि कर्तुं योग्यानि इन्द्रियाणि कर्मेन्द्रियाणि; तैः कर्मेन्द्रियैः। (१२) जितानि इन्द्रियाणि येन सः जितेन्द्रियः। (१३) मनसः, प्राणानां, इन्द्रियाणां च क्रियाः मनःप्राणेन्द्रियक्रियाः। (१४) यतानि इन्द्रियाणि मनः बुद्धिश्च येन सः यतेन्द्रियमनोबुद्धिः। (१५) विजितानि इन्द्रियाणि येन सः विजितेन्द्रियः। (१६) विषयाणां इन्द्रियाणां च संयोगः विषयेन्द्रियसंयोगः; तस्मात् विषयेन्द्रियसंयोगात्। (१७) संयतानि इन्द्रियाणि येन सः संयतेन्द्रियः।

196. **इष्ट**—(१) अनिष्टम्। (२) इष्टानिष्टोपपत्तिषु। (३) इष्टकामधुक्।—(१) न इष्टम् अनिष्टम्। (२) (विग्रहपद्धत्यै 'अनिष्ट' शब्दो द्रष्टव्यः)। (३) इष्टान् कामान् दुह्यति इति इष्टकामधुक्।

197. **इष्वास**—(१) परमेष्वासः। (२) महेष्वासाः।—(१) इष्वासानां [इषवः अस्यन्ते एभिः इति इष्वासाः (धनुर्धारिणो योधाः), तेषां] परमः परमेष्वासः। (२) इष्वासानां (विग्रहः पूर्ववत्) महान्तः महेष्वासाः।

## ई

198. **ईक्षण**—अश्रुपूर्णाकुलेक्षणम्—(विग्रहपद्धत्यै 'अश्रुपूर्ण' शब्दो द्रष्टव्यः)।

199. **ईत✓ई**—अतीतः—[विग्रहपद्धत्यै 'अति' (३) शब्दो द्रष्टव्यः]।

200. **ईप्सु**—कामेप्सुना—कामेभ्यः (भोगविषयेभ्यः) ईप्सा अस्य अस्ति इति कामेप्सुः, तेन।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



201. **ईश**—(१) गुडाकेश। (२) गुडाकेशः। (३) गुडाकेशेन। (४) देवेश। (५) भूतेश। (६) वित्तेशः। (७) हृषीकेश। (८) हृषीकेशम्। (९) हृषीकेशः।—(१-३) गुडकायाः (निद्रायाः) ईशः गुडाकेशः, तेन गुडाकेशेन; संबोधने विसर्गलोपः। (४) देवानां ईशः देवेशः; संबोधने विसर्गलोपः। (५) भूतानां ईशः भूतेशः; संबोधने विसर्गलोपः। (६) वित्तस्य ईशः वित्तेशः (धनपतिः, कुबेरः)। (७-९) हृषीकाणां (इन्द्रियाणां) ईशः हृषीकेशः; तम् हृषीकेशम्; संबोधने विसर्गलोपः।

202. **ईश्वर**—(१) अनीश्वरम्। (२) ईश्वरभावः। (३) परमेश्वर। (४) परमेश्वरम्। (५) महेश्वरः। (६) योगेश्वर। (७) योगेश्वरः। (८) योगेश्वरात्। (९) विश्वेश्वर।—(१) न ईश्वरः विद्यते अस्मिन् (विश्वे) इति अनीश्वरम्। (२) ईश्वरस्य (संपत्तिवतः) भावः ईश्वरभावः। (३-४) परमः ईश्वरः परमेश्वरः, तम् परमेश्वरम्; संबोधने विसर्गलोपः। (५) महान् ईश्वरः महेश्वरः। (६-८) योगस्य, योगानां वा, ईश्वरः योगेश्वरः; तस्मात् योगेश्वरात्; संबोधने विसर्गलोपः। (९) विश्वस्य ईश्वरः विश्वेश्वरः; संबोधने विसर्गलोपः।

## उ

203. **उक्त**—(१) यथोक्तम्। (२) विधानोक्ताः। (३) शास्त्रविधानोक्तम्।—(१) यथा उक्तं तथैव यथोक्तम्। (२) विधानैः (विधिवाक्यैः) उक्ताः विधानोक्ताः। (३) शास्त्रविधानेन तस्मिन् वा (शास्त्रे अन्तर्गतं विधानं तेन तस्मिन् वा) उक्तम् शास्त्रविधानोक्तम्।

204. **उग्र**—(१) उग्रकर्माणः। (२) उग्ररूपः।—(१) उग्राणि कर्माणि येषां ते उग्रकर्माणः। उग्रं रूपं यस्य सः उग्ररूपः।

205. **उच्छ्रित**—अत्युच्छ्रितम्—[विग्रहपद्धत्यै 'अति' (९) शब्दो द्रष्टव्यः]।

206. **उत्तम**—(१) अनुत्तमम्। (२) अनुत्तमाम्। (३) उत्तमविदाम्। (४) उत्तमाङ्गैः। (५) उत्तमौजाः। (६) द्विजोत्तम। (७) पुरुषोत्तम। (८) पुरुषोत्तमम्। (९) पुरुषोत्तमः। (१०) रथोत्तमम्।—(१-२) न उत्तमतरं यस्मात् कश्चित् तत् अनुत्तमम्, न उत्तमतरा यस्मात्काचित् सा अनुत्तमा, ताम् अनुत्तमाम्। (३) उत्तमं (आत्मतत्त्वं) ये विदन्ति ते उत्तमविदः, तेषाम् उत्तमविदाम्। (४) उत्तमैः अङ्गैः (शिरोभिः) उत्तमाङ्गैः। (५) उत्तमम् ओजः यस्य सः उत्तमौजाः। (६) द्विजेषु उत्तमः द्विजोत्तमः; संबोधने विसर्गलोपः। (७-९) पुरुषाणां, पुरुषेषु वा, उत्तमः पुरुषोत्तमः; तम् पुरुषोत्तमम्; संबोधने विसर्गलोपः। (१०) रथानां रथेषु वा उत्तमः रथोत्तमः।

207. **उत्तर**—(१) उत्तरायणम्। (२) चेलाजिनकुशोत्तरम्। (३) चैलाजिनकुशोत्तरम्।—(१) [विग्रहपद्धत्यै 'अयन' (१) शब्दो द्रष्टव्यः]। (२-३) [विग्रहपद्धतिभ्यां 'अजिन' (१-२) शब्दौ द्रष्टव्यौ]।

208. **उत्थित**—निद्रालस्यप्रमादोत्थम्—[विग्रहपद्धत्यै 'आलस्य' (१) शब्दो द्रष्टव्यः]।

209. **उत्सन्न**—उत्सन्नकुलधर्माणाम्—उत्सन्नाः कुलधर्माः (कुलेषु परम्परागताः ये धर्माः ते) येषां ते उत्सन्नकुलधर्माः, तेषाम्।

210. **उत्सादन**—उत्सादनार्थम्—[विग्रहपद्धत्यै 'अर्थ' (११) शब्दो द्रष्टव्यः]।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



211. **उत्साह**—धृत्युत्साहसमन्वितः—धृत्युत्साहाभ्यां (धृतिश्च उत्साहश्च धृत्युत्साहौ, ताभ्यां) समन्वितः ।

212. **उदन्**--उदपाने--उदन् (जलं) तस्य पानम् उदपानम् (सरः), तस्मिन् ।

213. **उदर**--(१) बहूदरम् । (२) वृकोदरः ।--(१) बहूनि उदराणि यस्य सः बहूदरः, तम् बहूदरम् । (२) वृकस्य इव उदरं यस्य सः वृकोदरः (भीमः) ।

214. **उदासीन**--सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु ।--[विग्रहपद्धत्यै 'अरि' (३) शब्दो दृष्टव्यः] ।

215. **उद्भव**--(१) अमृतोद्भवम् । (२) कामक्रोधोद्भवम् । (३) ब्रह्मोद्भवम् ।--(१) [विग्रहपद्धत्यै 'अमृत' (२) शब्दो दृष्टव्यः] । (२) कामक्रोधाभ्यां (कामश्च क्रोधश्च कामक्रोधौ, ताभ्यां) उद्भवः यस्य स कामक्रोधोद्भवः, तम् कामक्रोधोद्भवम् । (३) ब्रह्म उद्भवः (उत्पत्तिस्थानं) यस्य तत् ब्रह्मोद्भवम्, तमपि ब्रह्मोद्भवम् ।

216. **उद्भवकर**—भूतभावोद्भवकरः—भूतभावस्य (भूतानां भावः भूतभावः, तस्य) उद्भवकरः (उद्भवं करोति इति) ।

217. **उद्यतायुध**—दिव्यानेकोद्यतायुधम्—[विग्रहपद्धत्यै 'अनेक' (६) शब्दो दृष्टव्यः] ।

218. **उद्वेग**—हर्षामर्षभयोद्वेगैः—(विग्रहपद्धत्यै 'अमर्ष' शब्दो दृष्टव्यः) ।

219. **उद्वेगकर**—अनुद्वेगकरम्—न उद्वेगकरम् (उद्वेगं कारयति इति)

220. **उपकारिन्**—अनुपकारिणे—न उपकारी अनुपकारी, तस्मै ।

221. **उपपत्ति**—इष्टानिष्टोपपत्तिषु—(विग्रहपद्धत्यै 'अनिष्ट' शब्दो दृष्टव्यः) ।

222. **उपमा**—अमृतोपमम्—[विग्रहपद्धत्यै 'अमृत' (२) शब्दो दृष्टव्यः] ।

223. **उपस्थ**—रथोपस्थे—रथस्य उपस्थः (मध्यभागः) तस्मिन् ।

224. **उपहत**—(१) लोभोपहतचेतसः । (२) कार्पण्यदोषोपहतस्वभावः ।—(१) लोभेन उपहतानि चेतांसि येषां ते । (२) कार्पण्यदोषेन (कार्पण्यं एव दोषः कार्पण्यदोषः, तेन) उपहतः स्वभावः यस्य सः कार्पण्यदोषोपहतस्वभावः ।

225. **उपहृत**—भक्त्युपहृतम्—भक्त्या उपहृतम् ।

226. **उपाश्रित**—मामुपाश्रिताः—मामेव उपाश्रिताः (आश्रयं मत्वा स्थिताः) ।

227. **उपासन**—आचार्योपासनम्—विग्रहपद्धत्यै 'आचार्य' शब्दो दृष्टव्यम् ।

228. **उभय**—उभयविभ्रष्टः—उभयोः, उभयतः वा, विभ्रष्टः ।

229. **उरु**—बहुबाहूरुपादम्—बहवः बाहवः उरवः पादाः च यस्य शरीरे सन्ति सः बहुबाहूरुपादः, तम् ।

## ऊ

230. **ऊर्ध्व**—ऊर्ध्वमूलम्—ऊर्ध्वं मूलं यस्य सः ऊर्ध्वमूलः, तम् ।

231. **ऊष्म**—ऊष्मपाः—ऊष्म ये पिबन्ति ते (पितरः) ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



### ऋ

232. **ऋषभ**—(१) पुरुषर्षभ। (२) भरतर्षभ—( १ ) पुरुषेषु ऋषभः इव पुरुषर्षभः। संबोधने विसर्गलोपः। ( २ ) भरतेषु (भरतवंशीयेषु) ऋषभः इव भरतर्षभः। संबोधने विसर्गलोपः।

233. **ऋषि**—(१) देवर्षिः। (२) देवर्षीणाम्। (३) महर्षयः। (४) महर्षीणाम्। (५) राजर्षयः।—( १-२ ) देवेषु ऋषिः, देव इव ऋषिः वा, देवर्षिः; देवर्षीणाम् इति षष्ठीबहुवचनम्। ( ३-४ ) महान्तः ऋषयः महर्षयः; तेषां महर्षीणाम्। ( ५ ) राजसु ऋषयः, राजानः एव ऋषयः वा, राजर्षयः।

### ए

234. **एक**—(१) एकभक्तिः। (२) एकस्थम्। (३) एकाक्षरम् (४) एकाग्रम्। (५) एकाग्रेण। (६) एकान्तम्। (७) एकांशेन।—( १ ) एकस्मिन् एव भक्तिः यस्य सः एकभक्तिः। ( २ ) एकस्मिन् स्थितम् एकस्थम्। ( ३-७ ) [विग्रहपद्धतिभ्यः 'अक्षर' (२), 'अग्र' (१-२), 'अन्त' (९), 'अंश', शब्दाः क्रमेण द्रष्टव्याः]।

235. **एकधा**—अनेकधा—न एकधा (एकया रीत्या)।

236. **एतद्**—एतद्योनीनि—एताः योनयः येषां तानि।

237. **एवम्**—(१) एवंरूपः। (२) एवंविधः।—( १ ) एवं (एतादृशं) रूपं यस्य सः एवंरूपः। ( २ ) एवं (एतादृशा) विधा यस्य सः एवंविधः।

### ऐ

238. **ऐश्वर्य**—(१) भोगैश्वर्यगतिम्। (२) भोगैश्वर्यप्रसक्तानाम्।—( १ ) भोगाः ऐश्वर्यं च यस्यां सा भोगैश्वर्यगतिः, ताम् भोगैश्वर्यगतिम्। ( २ ) भोगेषु ऐश्वर्ये च ये प्रसक्ताः ते भोगैश्वर्यप्रसक्ताः, तेषाम् भोगैश्वर्यप्रसक्तानाम्।

### ओ

239. **ओजस्**—उत्तमौजाः—[विग्रहपद्धत्यै 'उत्तम' (५) शब्दो द्रष्टव्यः]।

240. **ओम्**—ओंकारः—'ओम्' इति रवः क्रियते यस्योच्चारणेन सः वर्णविशेषः।

### औ

241. **औपम्य**—आत्मौपम्येन—[विग्रहपद्धत्यै 'आत्मन्' (१९) शब्दो द्रष्टव्यः]।

### क

242. **कटु**—कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः—(विग्रहपद्धत्यै 'अत्युष्ण' शब्दो द्रष्टव्यः)।

243. **कपि**—कपिध्वजः—कपिः (कपिचिन्हं) ध्वजे यस्य सः।

244. **कमलपत्र**—कमलपत्राक्ष—(विग्रहपद्धत्यै 'अक्ष' शब्दो द्रष्टव्यः)।

245. **कमलासन**—कमलासनस्थम्—कमलासने (कमलं एव आसनं कमलासनं, तस्मिन्) स्थितः कमलासनस्थः, तम्।

246. **कराल**—(१) दंष्ट्राकरालानि। (२) बहुदंष्ट्राकरालम्।—( १ ) दंष्ट्राभिः करालानि दंष्ट्राकरालानि। ( २ ) बहुदंष्ट्राभिः (बहुभिः दंष्ट्राभिः) करालम् बहुदंष्ट्राकरालम्।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



247. **कर्तृ**—(१) अकर्तारम्। (२) आदिकर्त्रे।—(१) न कर्तृ अकर्तृ, तम् अकर्तारम्। (२) [विग्रहपद्धत्यै 'आदि' (५) शब्दो द्रष्टव्यः]।

248. **कर्तृत्व**—कार्यकारणकर्तृत्वे—कार्यकारणयोः (कार्यं च कारणं च कार्यकारणे, तयोः) कर्तृत्वम्, कार्यकारणकर्तृत्वम्, तस्मिन्।

249. **कर्मकृत्**—अकर्मकृत्—न कर्मकृत् (कर्म करोति इति)।

250. **कर्मन्**—(१) अकर्म। (२) अकर्मणः। (३) अकर्मणि। (४) इन्द्रियकर्माणि। (५) उग्रकर्माणः। (६) कर्मचोदना। (७) कर्मजम्। (८) कर्मजा। (९) कर्मजान्। (१०) कर्मफलम्। (११) कर्मफले। (१२) कर्मबन्धनः। (१३) कर्मबन्धम्। (१४) कर्मबन्धनैः। (१५) कर्मयोगम्। (१६) कर्मयोगः। (१७) कर्मयोगेन। (१८) कर्मसङ्गिनाम्। (१९) कर्मसङ्गिषु। (२०) कर्मसङ्गेन। (२१) कर्मसमुद्भवः। (२२) कर्मसङ्ग्रहः। (२३) कर्मसंज्ञितः। (२४) कर्मसन्न्यासात्। (२५) कर्मानुबन्धीनि। (२६) कर्मेन्द्रियाणि। (२७) कर्मेन्द्रियैः। (२८) क्षत्रकर्म। (२९) गुणकर्मविभागयोः। (३०) गुणकर्मविभागशः। (३१) गुणकर्मसु। (३२) पुण्यकर्मणाम्। (३३) प्राणकर्माणि। (३४) ब्रह्मकर्म। (३५) भीमकर्मा। (३६) मोघकर्माणः। (३७) यज्ञदानतपः कर्म। (३८) वैश्यकर्म। (३९) सर्वकर्मणाम्। (४०) सर्वकर्माणि। (४१) स्वकर्मणा।—(१–३) न कर्म (कर्मणः व्यावृत्तिः) अकर्म; तस्य अकर्मणः; तस्मिन् अकर्मणि। (४–५) [विग्रहपद्धतिभ्यां 'इन्द्रिय' (२), 'उग्र' (१) शब्दौ क्रमेण द्रष्टव्यौ]। (६) कर्मणां चोदना कर्मचोदना। (७–९) कर्मणा जातम् कर्मजम्; तान् कर्मजान्; सा कर्मजा। (१०–११) कर्मणः फलम् कर्मफलम्; तस्मिन् कर्मफले। (१२) कर्माणि बन्धनं यस्य सः कर्मबन्धनः। (१३) कर्मणा उत्पादितः बन्धः कर्मबन्धः, तम् कर्मबन्धम्। (१४) कर्मणा उत्पादितानि बन्धनानि कर्मबन्धनानि, तैः कर्मबन्धनैः। (१५–१७) कर्मणा योगः, कर्म एव योगः वा, कर्मयोगः; तम् कर्मयोगम्; तेन कर्मयोगेन। (१८–१९) कर्मभिः येषां सङ्गः भवति ते कर्मसङ्गिनः; तेषाम् कर्मसङ्गिनाम्; तेषु कर्मसङ्गिषु। (२०) कर्मभिः सङ्गः कर्मसङ्गः तेन कर्मसङ्गेन। (२१) कर्मणः समुद्भवः यस्य सः कर्मसमुद्भवः। (२२) कर्मणां सङ्ग्रहः (कर्मसु आवश्यकानि तत्त्वानि) कर्मसङ्ग्रहः। (२३) कर्मशब्देन यः संज्ञितः सः कर्मसंज्ञितः। (२४) कर्मणां सन्न्यासः कर्मसन्न्यासः, तस्मात् कर्मसन्न्यासात्। (२५) (विग्रहपद्धत्यै 'अनुबन्ध' शब्दो द्रष्टव्यः)। शङ्करानुमतं विवरणं तु कर्म (धर्माधर्मलक्षणम्) अनुबन्धः (पश्चाद्भावी उद्भूतिः) येषां तानि कर्मानुबन्धीनि। (२६–२७) [विग्रहपद्धत्यै 'इन्द्रिय' (१०-११) शब्दौ क्रमेण द्रष्टव्यौ]। (२८) क्षत्रस्य (स्वाभाविकं) कर्म क्षत्रकर्म। (२९–३०) गुणकर्मणां (गुणाश्च कर्माणि च गुणकर्माणि, तेषां) विभागौ गुणकर्मविभागौ; तयोः गुणकर्मविभागयोः; तत्पूर्वकम् गुणकर्मविभागशः। (३१) गुणप्रेरितानि कर्माणि गुणकर्माणि, तेषु गुणकर्मसु। (३२) पुण्यानि कर्माणि येन कृतानि ते पुण्यकर्माणः; तेषां पुण्यकर्मणाम्। (३३) प्राणानां कर्माणि प्राणकर्माणि। (३४) ब्रह्मणः (ब्राह्मणजातेः) कर्म ब्रह्मकर्म। (३५) भीमानि कर्माणि यः कुरुते सः भीमकर्मा। (३६) मोघानि (निरर्थकानि)



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कर्माणि ये कुर्वन्ति ते मोघकर्माणः। (३७) यज्ञदानतपः (यज्ञः दानं, तपः एतेषां समाहारः) एव कर्म यज्ञदानतपः कर्म। (३८) वैश्यानां (स्वाभाविकं) कर्म वैश्यकर्म। (३९-४०) सर्वाणि कर्माणि सर्वकर्माणि; तेषां सर्वकर्मणाम्। (४१) स्वस्य (आत्मनः) कर्म स्वकर्म, तेन स्वकर्मणा।

251. **कर्मफल**—(१) कर्मफलत्यागः। (२) कर्मफलत्यागी। (३) कर्मफलप्रेप्सुः। (४) कर्मफलसंयोगम्। (५) कर्मफलहेतुः। (६) कर्मफलासङ्गम्।—(१) कर्मफलस्य (कर्मणः फलं कर्मफलम्, तस्य) त्यागः कर्मफलत्यागः। (२) कर्मफलं (कर्मणः फलं) यः त्यजति सः कर्मफलत्यागी। (३) कर्मफलं (कर्मणः फलं) यः प्रेप्सति सः कर्मफलप्रेप्सुः (४) कर्मफलयोः (कर्म च फलं च कर्मफले, तयोः) संयोगः कर्मफलसंयोगः, तम् कर्मफलसंयोगम्। (५) कर्मफले (कर्मणः फले) हेतुः यस्य सः कर्मफलहेतुः। (६) (विग्रहपद्धत्यै 'आसङ्गः' शब्दो द्रष्टव्यः)।

252. **कलिल**—मोहकलिलम्—मोहस्य कलिलम् (राशिः)।

253. **कल्प**—(१) कल्पक्षये। (२) कल्पादौ।—(१) कल्पस्य क्षयः कल्पक्षयः, तस्मिन् कल्पक्षये। (२) कल्पस्य आदिः कल्पादिः तस्मिन् कल्पादौ।

254. **कल्मष**—(१) अकल्मषम्। (२) क्षीणकल्मषाः (३) विगतकल्मषः।—(१) न कल्मषं विद्यते यस्मिन् तत् अकल्मषम्। (२) क्षीणं कल्मषं येभ्यः ते क्षीणकल्मषाः। (३) विगतं कल्मषं यस्मात् सः विगतकल्मषः।

255. **कल्याण**—कल्याणकृत्—कल्याणं करोति इति।

256. **काङ्क्षिन्**—(१) दर्शनकाङ्क्षिणः। (२) मोक्षकाङ्क्षिभिः।—(१) दर्शनं ये काङ्क्षन्ति ते दर्शनकाङ्क्षिणः। (२) मोक्षं ये काङ्क्षन्ति ते मोक्षकाङ्क्षिणः; तैः मोक्षकाङ्क्षिभिः।

257. **काम**—(१) अर्थकामान्। (२) इष्टकामधुक्। (३) कामकामाः। (४) कामकामी। (५) कामकारतः। (६) कामकारेण। (७) कामक्रोधपरायणाः। (८) कामक्रोधवियुक्तानाम्। (९) कामक्रोधोद्भवम्। (१०) कामधुक्। (११) कामभोगेषु। (१२) कामरूपम्। (१३) कामरूपेण। (१४) कामहैतुकम्। (१५) कामात्मानः। (१६) कामेप्सुना। (१७) धर्मकामार्थान्। (१८) विनिवृत्तकामाः। (१९) सर्वकामेभ्यः।—(१-२) [विग्रहपद्धतिभ्यां 'अर्थ' (३), 'इष्ट' (३) शब्दौ क्रमेण द्रष्टव्यौ]। (३) कामान् (विषयान्) कामयन्ते इति कामकामाः। (४) कामान् कामयितुं शीलं अस्य इति कामकामी। (५-६) कामस्य कृतिः इयं इति कामकारः, तस्मात् कामकारतः; तेन कामकारेण। (७) कामक्रोधौ (कामश्च क्रोधश्च तौ) परायणाः (तन्निष्ठाः) कामक्रोधपरायणाः। (८) कामक्रोधाभ्यां (कामश्च क्रोधश्च कामक्रोधौ, ताभ्यां) वियुक्ताः कामक्रोधवियुक्ताः, तेषां कामक्रोधवियुक्तानाम्। (९) [विग्रहपद्धत्यै 'उद्भवः' (२) शब्दो द्रष्टव्यः]। (१०) कामान् दुह्यति इति कामधुक्। (११) कामानां (विषयाणां) भोगाः कामभोगाः, तेषु कामभोगेषु। (१२-१३) कामः एव रूपं यस्य सः कामरूपः, तम् कामरूपम्, तेन कामरूपेण। (१४) कामः हेतुः अस्य इति कामहैतुकम्। (१५) [विग्रहपद्धत्यै 'आत्मन्' (२०) शब्दो द्रष्टव्यः]। (१६)



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(विग्रहपद्धत्यै 'इप्सु' शब्दो दृष्टव्यः) (१७) [विग्रहपद्धत्यै 'अर्थ' (१५) शब्दो दृष्टव्यः]। (१८) विनिवृत्ताः कामाः येभ्यः ते विनिवृत्तकामाः। (१९) सर्वे कामाः सर्वकामाः, तेभ्यः सर्वकामेभ्यः।

258. **कामभोग**—कामभोगार्थम्—[विग्रहपद्धत्यै 'अर्थ' (१२) शब्दो दृष्टव्यः]।

259. **कामराग**—कामरागविवर्जितम्—कामरागात् (कामेषु रागः कामरागः, तस्मात्) विवर्जितम्।

260. **कामरागबल**—कामरागबलान्विताः—[विग्रहपद्धत्यै 'अन्वित' (१) शब्दो दृष्टव्यः]।

261. **कामसङ्कल्प**—कामसङ्कल्पवर्जिताः—कामसङ्कल्पाः [कामेभ्यः, कामार्थे वा, कृताः सङ्कल्पाः] वर्जिताः यैः ते।

262. **काम् (इच्छ्)**—(१) कामकामाः। (२) योद्धुकामान्।—(१) [विग्रहपद्धत्यै 'काम' (३) शब्दो दृष्टव्यः]। (२) योद्धुं ये कामयन्ति ते योद्धुकामाः तान्।

263. **कामिन्**—कामकामी—[विग्रहपद्धत्यै 'काम' (४) शब्दो दृष्टव्यः]।

264. **कामोपभोग**—कामोपभोगपरमाः—कामोपभोगः (कामानां उपभोगः) एव परमं श्रेयः ये मन्यन्ते ते।

265. **काम्या**—हितकाम्यया—हितस्य काम्या (इच्छा) हितकाम्या, तया।

266. **काय**—कायशिरोग्रीवम्—कायः (कबन्धः), शिरः, ग्रीवा च एतेषां समाहारः कायशिरोग्रीवम्, तम्।

267. **कायक्लेश**—कायक्लेशभयात्—कायक्लेशस्य (कायं, कायस्य वा, क्लेशः कायक्लेशः, तस्य) भयम् कायक्लेशभयम्, तस्मात्।

268. **कारण**—(१) आत्मकारणात्। (२) कार्यकारणकर्तृत्वे।—(१–२) [विग्रहपद्धतिभ्यां 'आत्मन्' (६), 'कर्तृत्व' शब्दौ क्रमेण दृष्टव्यौ]।

269. **कार्पण्यदोष**—कार्पण्यदोषोपहतस्वभावः।—[विग्रहपद्धत्यै 'उपहत' (२) शब्दः दृष्टव्यः]।

270. **कार्य**—(१) अकार्यम्। (२) कार्यकारणकर्तृत्वे। (३) कार्याकार्यव्यवस्थितौ। (४) कार्याकार्ये।—(१) न कार्यम् अकार्यम् (कर्तुं अयोग्यम्)। (२–४) [विग्रहपद्धतिभ्यः 'कर्तृत्व', 'अकार्य', (१–२) शब्दाः क्रमेण दृष्टव्याः]।

271. **काल**—(१) अन्तकाले। (२) प्रयाणकाले।—(१) [विग्रहपद्धत्यै 'अन्त' (६) शब्दो दृष्टव्यः]। (२) प्रयाणस्य (मृत्योः) कालः प्रयाणकालः, तस्मिन् प्रयाणकाले।

272. **कालानल**—कालानलसन्निभानि—कालनलस्य [काले (प्रलयकाले) यः अनलः आविर्भवति सः कालानलः, तस्य] सन्निभानि (सदृशानि)।

273. **काशि**—काशिराजः—काश्याः राजः ('राज्' शब्दस्य प्रथमाएकवचनम्)।

274. **किम्**—किमाचारः—[विग्रहपद्धत्यै 'आचार' (१) शब्दो दृष्टव्यः]।

275. **किल्बिष**—(१) संशुद्धकिल्बिषः। (२) सर्वकिल्बिषैः।—(१) संशुद्धः किल्बिषेभ्यः संशुद्धकिल्बिषः। (२) सर्वैः किल्बिषैः सर्वकिल्बिषैः।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



276. **कीर्ति**—(१) अकीर्तिम् । (२) अकीर्तिः ।—(१-२) न कीर्तिः अकीर्तिः (अपकीर्तिः); ताम् अकीर्तिम् ।

277. **कुन्ति**—कुन्तिपुत्रः—कुन्त्याः पुत्रः ।

278. **कुरु**—(१) कुरुक्षेत्रे । (२) कुरुनन्दन । (३) कुरुप्रवीर । (४) कुरुवृद्धः । (५) कुरुश्रेष्ठ । (६) कुरुसत्तम ।—(१) कुरुदेशे स्थितं क्षेत्रम् (रणभूमिः) कुरुक्षेत्रम्; तस्मिन् कुरुक्षेत्रे । (२) कुरुवंशीयानां नन्दनः कुरुनन्दनः; संबोधने विसर्गलोपः । (३) कुरुषु (कुरुवंशीयेषु) प्रवीरः कुरुप्रवीरः । संबोधने विसर्गलोपः । (४) कुरुषु वृद्धः कुरुवृद्धः । (५) कुरुषु श्रेष्ठः कुरु श्रेष्ठः । संबोधने विसर्गलोपः । (६) कुरुषु सत्तमः (ये सत्पुरुषाः तेषु उत्तमः) कुरुसत्तमः । संबोधने विसर्गलोपः ।

279. **कुल**—(१) कुलक्षये । (२) कुलघ्नानाम् । (३) कुलधर्माः । (४) कुलस्त्रियः ।—(१) कुलस्य क्षयः कुलक्षयः, तस्मिन् कुलक्षये । (२) कुलं (स्वकीयं कुलं) ये घ्नन्ति ते कुलघ्नाः, तेषाम् कुलघ्नानाम् । (३) कुले (परम्परया प्रचलिताः ये) धर्माः ते कुलधर्माः । (४) कुले समाविष्टाः याः स्त्रियः ताः; कुलस्त्रियः ।

280. **कुलक्षय**—कुलक्षयकृतम्—कुलक्षयस्य (कुलस्य क्षयः कुलक्षयः, तस्य) करणेन यत्कृतं तत्, तन्निमित्तं वा ।

281. **कुलधर्म**—उत्सन्नकुलधर्माणाम्—(विग्रहपद्धत्यै 'उत्सन्न' शब्दो द्रष्टव्यः) ।

282. **कुश**—(१) चैलाजिनकुशोत्तरम् । (२) चैलाजिनकुशोत्तरम्—(१-२) [विग्रहपद्धतिभ्यां 'अजिन' (१-२) शब्दौ द्रष्टव्यौ] ।

283. **कुशल**—अकुशलम्—न कुशलम् (अनिष्टम्) ।

284. **कुसुम**—कुसुमाकरः (वसन्तः)—(विग्रहपद्धत्यै 'आकर' शब्दो द्रष्टव्यः) ।

285. **कूट**—(१) कूटस्थम् । (२) कूटस्थः—(१-२) कूटे स्थितः कूटस्थः (उपाधिभिः अलिप्तः प्रत्यगात्मा); तम् कूटस्थम् ।

286. **कृ**—(१) अकारः । (२) अकीर्तिकरम् । (३) अहङ्कृतः । (४) ओंकारः । (५) कल्याणकृत् (६) कामकारतः । (७) कामकारेण; (८) कुलक्षयकृतम् । (९) कृतकृत्यः । (१०) कृतनिश्चयः । (११) कृताञ्जलिः । (१२) कृत्स्नकर्मकृत् । (१३) दुष्कृताम् । (१४) निःश्रेयसकरौ । (१५) पापकृत्तमः । (१६) पुण्यकृतान् (१७) पुण्यकृताम् । (१८) प्रियकृत्तमः । (१९) मत्कर्मकृत् । (२०) लोकक्षयकृत् । (२१) वर्णसङ्करकारकैः । (२२) वेदान्तकृत् (२३) सुकृतस्य । (२४) सुकृतम् ।—(१-८) [विग्रहपद्धतिभ्यः 'अ', 'अकीर्ति', 'अस्मद्', 'ओम्', 'कल्याण', 'काम' (५-६), 'कुलक्षय', शब्दाः क्रमेण द्रष्टव्याः] । (९) कृत्यं (कर्तव्यं) येन कृतं सः कृतकृत्यः । (१०) निश्चयः येन कृतः सः कृतनिश्चयः । (११) (विग्रहपद्धत्यै 'अञ्जलि' शब्दो द्रष्टव्यः) । (१२) कृत्स्नकर्म (कृत्स्नं कर्तव्यं यत्कर्म तत्) यः करोति सः कृत्स्नकर्मकृत् । (१३) दुष्कृतानि (दुष्टानि कर्माणि) ये कुर्वन्ति ते दुष्कृताः; तेषाम् दुष्कृताम् । (१४) निःश्रेयसं एते कुरुतः इति निःश्रेयसकरौ । (१५) पापानि ये कुर्वन्ति ते पापकृतः, तेषां अधमः पापकृत्तमः । (१६) पुण्यकृद्भिः ये प्राप्यन्ते ते पुण्यकृताः (लोकाः)



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तान् पुण्यकृतान् । (१७) पुण्यानि यैः कृतानि ते पुण्यकृतः, तेषां पुण्यकृताम् । (१८) प्रियं ये कुर्वन्ति ते प्रियकृतः, तेषां उत्तमः प्रियकृत्तमः । (१९) मत्कर्म (मम प्रीत्यै, मदर्थं वा, मत्कृते कर्म) यः कुरुते सः मत्कर्मकृत् । (२०) लोकक्षयं (लोकानां क्षयः लोकक्षयः, तम्) यः कुरुते सः लोकक्षयकृत् । (२१) वर्णसङ्करान् (वर्णानां सङ्कराः वर्णसङ्कराः, तान्) कुर्वन्ति (उत्पादन्ति) इति वर्णसङ्करकारकाः, तैः वर्णसङ्करकारकैः । (२२) वेदान्ताः (वेदानां अन्ताः अन्तिमभागाः) येन कृताः सः वेदान्तकृत् । 'वेदान्तार्थसंप्रदायकृत्' इति शङ्करः । (२३–२४) सुष्ठु कृतम् सुकृतम्; तस्य सुकृतस्य ।

287. **कृत** (noun)—(१) अकृतेन । (२) कृतान्ते ।—(१) न कृतम् (कर्म) अकृतम्, तेन अकृतेन । (२) [विग्रहपद्धत्यै 'अन्त' (१०) शब्दो द्रष्टव्यः] ।

288. **कृतबुद्धित्व**—अकृतबुद्धित्वात्—न कृता बुद्धिः (असंस्कृता बुद्धिः) अकृतबुद्धिः, तस्याः भावः अकृतबुद्धित्वम्, तस्मात् ।

289. **कृतात्मन्**—अकृतात्मानः—[कृतः (संस्कृतः) आत्मा येषां ते कृतात्मानः] न कृतात्मानः अकृतात्मानः ।

290. **कृतिन्**—(१) दुष्कृतिनः । (२) सुकृतिनः ।—(१) दुष्टानि कृतानि (कर्माणि) येषां ते दुष्कृतिनः । (२) सुष्ठु कृतानि (कर्माणि) येषां ते सुकृतिनः ।

291. **कृते**—महीकृते—मही पृथिवी, तस्याः कृते (अर्थे) ।

292. **कृत्य**—कृतकृत्यः—[विग्रहपद्धत्यै 'कृ' (९) शब्दो द्रष्टव्यः] ।

293. **कृत्व**—सहस्रकृत्वः—सहस्र कृत्वः (सहस्रधा, सहस्रवारं वा) ।

294. **कृत्स्न**—कृत्स्नवित्—कृत्स्नं वेत्ति इति ।

295. **कृत्स्नकर्म**—कृत्स्नकर्मकृत्—[विग्रहपद्धत्यै 'कृ' (१२) शब्दो द्रष्टव्यः] ।

296. **कृत्स्नविद्**—अकृत्स्नविदः—(कृत्स्नं विदन्ति इति कृत्स्नविदः); न कृत्स्नविदः अकृत्स्नविदः ।

297. **कृषि**—कृषिगोरक्ष्यवाणिज्यम्—कृषिः (कृषिकर्म), गोरक्ष्यं (गवां रक्षणम्), वाणिज्यं च, एतेषां समाहारः कृषिगोरक्ष्यवाणिज्यम् ।

298. **कृष्णा**—शुक्लकृष्णे—शुक्ला च कृष्णा च ।

299. **केशव**—केशवार्जुनयोः—[विग्रहपद्धत्यै 'अर्जुन' (१) शब्दो द्रष्टव्यः] ।

300. **केशि**—केशिनिषूदन—केशिनामकस्य राक्षसस्य निषूदनः (संहर्ता) केशिनिषूदनः । संबोधने विसर्गलोपः ।

301. **क्रिया**—(१) अक्रियः । (२) दानक्रियाः । (३) मनःप्राणेन्द्रियक्रियाः । (४) यज्ञतपःक्रियाः । (५) यज्ञदानतपः क्रियाः ।—(१) क्रियाभ्यः व्यावृत्तः इति अक्रियः । (२) दानरूपाः क्रियाः दानक्रियाः । (३) [विग्रहपद्धत्यै 'इन्द्रिय' (१३) शब्दो द्रष्टव्यः] । (४) यज्ञाः तपांसि च, तद्रूपाः क्रियाः यज्ञतपःक्रियाः । (५) यज्ञाः दानानि तपांसि च, तद्रूपाः क्रियाः यज्ञदानतपःक्रियाः ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



302. **क्रियाविशेष**—क्रियाविशेषबहुलाम्—क्रियाविशेषाः (विशिष्टाः क्रियाः) बहुलाः (बहवः) यस्यां सा क्रियाविशेषबहुला, ताम्।

303. **क्रोध**—(१) अक्रोधः। (२) कामक्रोधपरायणाः। (३) कामक्रोधवियुक्तानाम्। (४) कामक्रोधोद्भवम्।—(१) न क्रोधः (क्रोधस्य अभावः) अक्रोधः। (२-४) [विग्रहपद्धतिभ्यः 'काम' (७-९) शब्दाः क्रमेण द्रष्टव्याः]।

304. **क्लेद्य**—अक्लेद्यः—न क्लेद्यः (क्लेदनशीलः)।

305. **क्षत्र**—क्षत्रकर्म—[विग्रहपद्धत्यै 'कर्मन्' (२८) शब्दो द्रष्टव्यः]।

306. **क्षत्रिय**—ब्राह्मणक्षत्रियविशाम्—ब्राह्मणानां, क्षत्रियाणां विशां (वैश्यानां) च।

307. **क्षपितकल्मष**—यज्ञक्षपितकल्मषाः—यज्ञैः क्षपितकल्मषाः (क्षपितं कल्मषं येषां ते)।

308. **क्षय**—(१) अक्षयम्। (२) अक्षयः। (३) कल्पक्षये। (४) कुलक्षये।—(१-२) यस्य क्षयः न भवति, सः अक्षयः, तत् अक्षयम्। (३-४) [विग्रहपद्धतिभ्यां 'कल्प' (१), 'कुल' (१) शब्दौ क्रमेण द्रष्टव्यौ]।

309. **क्षय्य**—अक्षय्यम्—यन्न क्षीयते तदक्षय्यम्, तम्।

310. **क्षर**—(१) अक्षरम्। (२) अक्षरः। (३) अक्षराणाम्। (४) अक्षरात्।—(१-४) यः न क्षरति सः अक्षरः, तम् अक्षरम्; यन्न क्षरति तदपि अक्षरम्; 'अक्षराणाम्' इति षष्ठ्याः बहुवचनम्; 'अक्षरात्' इति पञ्चम्याः एकवचनम्।

311. **क्षित्**—महीक्षिताम्—मह्याः क्षितः (शासकाः) महीक्षितः, तेषाम्।

312. **क्षीण**—क्षीणकल्मषाः—[विग्रहपद्धत्यैः 'कल्मष' (२) शब्दो द्रष्टव्यः]।

313. **क्षेत्र**—(१) कुरुक्षेत्रे। (२) क्षेत्रक्षेत्रज्ञयोः। (३) क्षेत्रक्षेत्रज्ञसंयोगात्। (४) क्षेत्रज्ञम्। (५) क्षेत्रज्ञः। (६) धर्मक्षेत्रे। (७) सर्वक्षेत्रेषु।—(१) [विग्रहपद्धत्यै 'कुरु' (१) शब्दो द्रष्टव्यः]। (२) क्षेत्रस्य क्षेत्रज्ञस्य क्षेत्रं य जानाति सः क्षेत्रज्ञः, तस्य च क्षेत्रक्षेत्रज्ञयोः। (३) क्षेत्रं च क्षेत्रज्ञः (क्षेत्रं यः जानाति सः) च, तयोः संयोगः क्षेत्रक्षेत्रज्ञसंयोगः, तस्मात् क्षेत्रक्षेत्रज्ञसंयोगात्। (४-५) क्षेत्रं यः जानाति सः क्षेत्रज्ञः; तम् क्षेत्रज्ञम्। (६) धर्मस्य (निर्णायकं) क्षेत्रम् धर्मक्षेत्रम्, तस्मिन् धर्मक्षेत्रे। (७) सर्वेषु क्षेत्रेषु सर्वक्षेत्रेषु।

314. **क्षेत्रज्ञ**—(१) क्षेत्रक्षेत्रज्ञयोः। (२) क्षेत्रक्षेत्रज्ञसंयोगात्।—(१-२) [विग्रहपद्धतिभ्यां 'क्षेत्र' (२-३) शब्दौ क्रमेण द्रष्टव्यौ]।

315. **क्षेम**—योगक्षेमम्—योगः (अप्राप्तस्य प्रापणम्) च क्षेमं (प्राप्तस्य रक्षणम्) च, एतयोः समाहारः, योगक्षेमम्, तम्।

## ग

316. **गज**—गजेन्द्राणाम्—[विग्रहपद्धत्यै 'इन्द्र' (१) शब्दो द्रष्टव्यः].

317. **गण**—(१) भूतगणान्। (२) मणिगणाः। (३) सुरगणाः।—(१) भूतानां गणाः (समूहाः) भूतगणाः, तान् भूतगणान्। (२) मणिनां गणाः मणिगणाः। (३) सुराणां गणाः सुरगणाः।

318. **गत**—(१) अन्तगतम्। (२) आदित्यगतम्। (३) गतरसम्। (४) गतव्यथः। (५) गतसङ्गस्य। (६) गतसंदेहः। (७) गतागतम्। (८) गतासून्। (९) मद्गतेन।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(१०) मनोगतान् । (११) सर्वगतम् । (१२) सर्वगतः । (१३) सर्वत्रगम् । (१४) सर्वत्रगः ।—(१-२) [विग्रहपद्धतिभ्यां 'अन्त' (७), 'आदित्य' (१) शब्दौ क्रमेण द्रष्टव्यौ] । (३) गतः रसः यस्मात् तत् गतरसम् । (४) गता व्यथा यस्मात् (यस्य हृदयात्) सः गतव्यथः । (५) गतः सङ्गः (सक्तिः) यस्मात् (यस्य हृदयात्) सः गतसङ्गः, तस्य गतसङ्गस्य । (६) गताः (निवृत्ताः) संदेहाः यस्मात् (यस्य मनसः) सः गतसंदेहः । (७) (विग्रहपद्धत्यै 'आगत' शब्दो द्रष्टव्यः) । (८) (विग्रहपद्धत्यै 'असु' शब्दो द्रष्टव्यः) । (९) मयि गतं (निवेशितं) मद्गतम्, तेन मद्गतेन । (१०) मनसि गताः (प्रविष्टाः स्थिताः वा) मनोगताः, तान् मनोगतान् । (११-१२) सर्वेषु (वस्तुषु स्थलेषु च) यत् गतं तत् सर्वगतम्; सर्वेषु......यः गतः सः सर्वगतः । (१३-१४) सर्वत्र गतम् (प्रविष्टम्) सर्वत्रगम्; सर्वत्र गतः (प्रविष्टः) सर्वत्रगः ।

319. **गतासु**—अगतासून्—[गताः (व्यावृत्ताः) असवः येषां ते गतासवः] न गतासवः अगतासवः, तान् अगतासून् ।

320. **गति**—(१) दुर्गतिम् । (२) प्राणापानगती । (३) भोगैश्वर्यगतिम् । (४) स्वर्गतिम् ।—(१) दुष्टा गतिः दुर्गतिः, ताम् दुर्गतिम् । (२) [विग्रहपद्धत्यै 'अपान' (१) शब्दो द्रष्टव्यः] । (३) [विग्रहपद्धत्यै 'ऐश्वर्य' (१) शब्दो द्रष्टव्यः] । (४) स्वर् (स्वर्गं प्रति गतिः) स्वर्गतिः, ताम् स्वर्गतिम् ।

321. **गद्गद**—सगद्गदम्—गद्गदेन (गद्गदितेन स्वरेण) सहितम् ।

322. **गन्तृ**—गन्तासि—[विग्रहपद्धत्यै 'अस्' (१) शब्दो द्रष्टव्यः] ।

323. **गन्धर्व**—गन्धर्वयक्षासुरसिद्धसङ्घाः ।—(विग्रहपद्धत्यै 'असुर' शब्दो द्रष्टव्यः) ।

324. **गम्य**—ज्ञानगम्यम्—ज्ञानेन गम्यम् (प्राप्यम्) ।

325. **गुडाका**—(१) गुडाकेश । (२) गुडाकेशः । (३) गुडाकेशेन ।—(१-३) [विग्रहपद्धतिभ्यः 'ईश' (१-३) शब्दाः द्रष्टव्याः] ।

326. **गुण**—(१) गुणकर्मविभागयोः । (२) गुणकर्मविभागशः । (३) गुणकर्मसु । (४) गुणप्रवृद्धाः । (५) गुणभेदतः । (६) गुणभोक्तृ । (७) गुणसङ्ख्याने । (८) गुणसङ्गः । (९) गुणसंमूढाः । (१०) गुणातीतः । (११) गुणान्वितम् । (१२) निर्गुणम् । (१३) विगुणः ।—(१-३) [विग्रहपद्धतिभ्यः 'कर्मन्' (२९-३१) शब्दाः क्रमेण द्रष्टव्याः] । (४) गुणैः प्रवृद्धाः गुणप्रवृद्धाः । (५) गुणानां भेदः गुणभेदः, तस्मात् गुणभेदतः । (६) गुणानां भोक्तृ गुणभोक्तृ । (७) गुणानां सङ्ख्यानम् गुणसङ्ख्यानम्, तस्मिन् गुणसङ्ख्याने । (८) गुणानां, गुणैः वा, सङ्गः गुणसङ्गः । (९) गुणैः संमूढाः गुणसंमूढाः । (१०-११) [विग्रहपद्धतिभ्यां 'अतीत' (१), 'अन्वित' (२) शब्दौ क्रमेण द्रष्टव्यौ] । (१२) निर्गताः गुणाः यस्मात् तत् निर्गुणम् । (१३) विगताः गुणाः यस्मात् सः विगुणः ।

327. **गुणत्व**—निर्गुणत्वात्—निर्गतः गुणाः यस्मात् सः निर्गुणः, तस्य भावः निर्गुणत्वम् ।

328. **गुणाभास**—सर्वेन्द्रियगुणाभासम्—सर्वेन्द्रियाणां (सर्वेषां इन्द्रियाणां) गुणाभासम् (गुणानां आभासम्, तेषां आभासात्मकम्) ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



329. **गुरु** (Noun)—देवद्विजगुरुप्राज्ञपूजनम्—देवानां, द्विजानां, गुरूणां, प्राज्ञानां च पूजनम्।

330. **गुह्य**—राजगुह्यम्—राजभिः गुह्यम् (गूहनीयम्), गुह्यानां राजा वा।

331. **गुह्यतम**—सर्वगुह्यतमम्—सर्वेभ्यः गुह्येभ्यः अधिकतमम्।

332. **गृह**—पुत्रदारगृहादिषु—[विग्रहपद्धत्यै 'आदि' (११) शब्दो दृष्टव्यः]।

333. **गृहीत**—धृतिगृहीतया—धृत्या या गृहीता सा धृतिगृहीता, तया।

334. **गोचर**—इन्द्रियगोचराः—[विग्रहपद्धत्यै 'इन्द्रिय' (३) शब्दो दृष्टव्यः]।

335. **गोप्तृ**—शाश्वतधर्मगोप्ता—शाश्वतधर्मस्य (शाश्वतः यः धर्मः सः शाश्वतधर्मः, तस्य) गोप्ता (रक्षयिता)।

336. **गोमुख**—पणवानकगोमुखाः—पणवानकाश्च गोमुखाश्च (वादित्रविशेषाः), अथवा पणवानकजातिविशेषाः गोमुखाः।

337. **गोरक्ष्य**—कृषिगोरक्ष्यवाणिज्यम्—(विग्रहपद्धत्यै 'कृषि' शब्दो दृष्टव्यः)।

338. **ग्राम**—(१) इन्द्रियग्रामम्। (२) भूतग्रामम्। (३) भूतग्रामः।—(१) [विग्रहपद्धत्यै 'इन्द्रिय' (४) शब्दो दृष्टव्यः]। (२–३) भूतानां ग्रामः (समूहः) भूतग्रामः; तम् भूतग्रामम्।

339. **ग्राह**—मूढग्राहेण—मूढस्य (मूढपुरुषस्य) इव ग्राहः मूढग्राहः, तेन।

340. **ग्राह्य**—बुद्धिग्राह्यम्—बुद्ध्या ग्राह्यम् (बुद्ध्या एव न इन्द्रियैः इति भावः)।

341. **ग्रीवा**—कायशिरोग्रीवम्—(विग्रहपद्धत्यै 'काय' शब्दो दृष्टव्यः)।

## च

342. **चक्र**—चक्रहस्तम्—चक्रं हस्ते यस्य सः चक्रहस्तः, तम्।

343. **चक्षुष्**—(१) ज्ञानचक्षुषः। (२) ज्ञानचक्षुषा। (३) स्वचक्षुषा।—(१) ज्ञानं (बुद्धिः) एव चक्षुः येषां ते ज्ञानचक्षुषः। (२) ज्ञानं (बुद्धिः) एव चक्षुः ज्ञानचक्षुः, तेन ज्ञानचक्षुषा। (३) स्वस्य (आत्मनः) चक्षुः स्वचक्षुः, तेन स्वचक्षुषा।

344. **चतुस्**—(१) चतुर्भुजेन। (२) चतुर्विधम्। (३) चतुर्विधाः। (४) चातुर्वर्ण्यम्।—(१) चतुः भुजाः यस्य, यस्मिन् वा, तत् चतुर्भुजम्; तेन चतुर्भुजेन। (२) चतुः विधाः यस्य तत् चतुर्विधम्, तम् चतुर्विधम्। (३) चतुः विधाः येषां ते चतुर्विधाः। (४) चतुः वर्णाः यस्मिन् (तन्त्रे) तत् चातुर्वर्ण्यम्, तम् चातुर्वर्ण्यम्।

345. **चर**—(१) अचरम्। (२) चराचरम्। (३) चराचरस्य। (४) सचराचरम्।—(१) (चरति इति चरम्); न चरम् अचरम्। (२–४) [विग्रहपद्धतिभ्यः 'अचर' (१-३) शब्दाः क्रमेण दृष्टव्याः]।

346. **चर्या**—ब्रह्मचर्यम्—ब्रह्मणः कृते (वेदाध्ययनाय) विहिता या चर्या सा ब्रह्मचर्या, तस्याः भावः ब्रह्मचर्यम् (उर्ध्वरेतसत्वम्)।

347. **चल**—(१) अचलम्। (२) अचलः। (३) अचला। (४) अचलाम्। (५) अचलेन।—(१–५) न चलम् (चलनशीलम्) अचलम्; न चलः अचलः; तमपि अचलम्। तेन अचलेन। न चला अचला, ताम् अचलाम्।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



348. **चलित**—चलितमानसः—चलितं मानसं यस्य सः ।

349. **चापल**—अचापलम्—न चापलम् (चापलस्य अभावः)।

350. **चारिन्**—नासाभ्यन्तरचारिणौ—(विग्रहपद्धत्यै 'अभ्यन्तर' शब्दो द्रष्टव्यः)।

351. **चिकीर्षु**—प्रियचिकीर्षवः—प्रियं कर्तुं ये इच्छन्ति ते।

352. **चित्त**—(१) मच्चित्तः। (२) मच्चित्ताः। (३) यतचित्तस्य। (४) यतचित्तात्मा।—(१–२) मयि चित्तं, यस्य सः मच्चित्तः; येषां ते मच्चित्ताः। (३) यतं चित्तं यस्य सः यतचित्तः, तस्य यतचित्तस्य। (४) [विग्रहपद्धत्यै 'आत्मन्' (३७) शब्दो द्रष्टव्यः]।

353. **चित्तत्व**—समचित्तत्वम्—समं (संकल्पविकल्परहितं) चित्तम् समचित्तम्, तस्य भावः समचित्तत्वम्।

354. **चित्तेन्द्रियक्रिया**—यतचित्तेन्द्रियक्रियः—यताः चित्तेन्द्रियक्रियाः (चित्तस्य इन्द्रियाणां च क्रियाः) येन सः।

355. **चिन्त्य**—(१) अचिन्त्यम्। (२) अचिन्त्यः।—(१–२) न चिन्त्यम् (चिन्तनाय अयोग्यम्) अचिन्त्यम्; न चिन्त्यः अचिन्त्यः, तमपि अचिन्त्यम्।

356. **चिर**—अचिरेण—न चिरेण (विना बिलम्बेन)।

357. **चेतस्**—(१) अचेतसः। (२) अपहृतचेतसाम्। (३) अव्यक्तासक्तचेतसाम्। (४) ज्ञानावस्थितचेतसः। (५) निर्विण्णचेतसा। (६) प्रसन्नचेतसः। (७) मय्यावेशित-चेतसाम्। (८) यतचेतसाम्। (९) युक्तचेतसः। (१०) लोभोपहतचेतसः। (११) विचेतसः। (१२) सचेताः।—(१) चेतः न विद्यते येषु ते अचेतसः (मूढाः अस्थिर-चित्ताः वा)। (२–४) [विग्रहपद्धतिभ्यः 'अपहृत' (१), 'अव्यक्त' (५), 'अवस्थित' शब्दाः क्रमेण द्रष्टव्याः]। (५) निर्विण्णं चेतः यस्य सः निर्विण्णचेताः, तेन निर्विण्ण-चेतसा। (६) प्रसन्नानि चेतांसि येषां ते प्रसन्नचेतसः। (७) (विग्रहपद्धत्यै 'आवेशित' शब्दो द्रष्टव्यः)। (८) यतानि चेतांसि येषां ते यतचेतसः, तेषां यतचेतसाम्। (९) युक्तानि चेतांसि येषां ते युक्तचेतसः। (१०) [विग्रहपद्धत्यै 'उपहत' (१) शब्दो द्रष्टव्यः]। (११) विगतानि चेतांसि येषां, येभ्यः वा, ते विचेतसः (विमूढाः)। (१२) चेतसा सहितः सचेताः (प्रसन्नचित्तः संभूत्वा)।

358. **चेष्टा**—युक्तचेष्टस्य—युक्ताः चेष्टाः (कर्मेन्द्रियाणां व्यापाराः) यस्य सः युक्तचेष्टः, तस्य।

359. **चेल**—चेलाजिनकुशोत्तरम्—[विग्रहपद्धत्यै 'अजिन' (१) शब्दो द्रष्टव्यः]।

360. **चैल**—चैलाजिनकुशोत्तरम्—[विग्रहपद्धत्यै 'अजिन' (२) शब्दो द्रष्टव्यः]।

361. **चोदना**—कर्मचोदना—[विग्रहपद्धत्यै 'कर्म' (६) शब्दो द्रष्टव्यः]।

362. **च्युत √च्यु**—अच्युत—च्युतिः यस्य न भवति सः अच्युतः;। संबोधने विसर्गलोपः।

### छ

363. **छिन्न √छिद्**—(१) छिन्नद्वैधाः। (२) छिन्नसंशयः। (३) छिन्नाभ्रम्।—(१) छिन्नः द्विधाभावः येषां ते छिन्नद्वैधाः। (२) छिन्नाः संशयाः यस्य सः छिन्नसंशयः। (३) छिन्नं अभ्रम् छिन्नाभ्रम्।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



364. **छेद्य√छिद्**—अच्छेद्यः—न छेद्यः (छेदनशीलः)।

**ज**

365. **जगत्**—(१) जगत्पते। (२) जगन्निवास।—(१) जगतः पतिः जगत्पतिः; । संबोधने विसर्गलोपः। (२) जगतः निवासः (निवासस्थानम्) जगन्निवासः। संबोधने विसर्गलोपः।

366. **जघन्यगुणवृत्त**—जघन्यगुणवृत्तस्थाः—जघन्यगुणवृत्ते जघन्यगुणनिर्मितं वृत्तं (जघन्यः गुणः जघन्यगुणः तेन निर्मितं) वृत्तम् जघन्यगुणवृत्तम्; तस्मिन् ये स्थिताः (तमोगुण-प्रेरितं येषां चारित्र्यं ते)।

367. **जघन्यगुणवृत्ति**—जघन्यगुणवृत्तिस्थाः—जघन्यगुणवृत्तौ [जघन्यगुणस्य (जघन्यः गुणः जघन्यगुणः तस्य) वृत्तिः जघन्यगुणवृत्तिः, तस्यां] ये स्थिताः ते (तमोगुणवृत्तिः येषां स्वभावः ते, तमोगुणप्रकृतयः इति यावत्)।

368. **जङ्गम**—स्थावरजङ्गमम्—स्थावरं च जङ्गमं च।

369. **जन**—(१) जनसंसदि। (२) जनाधिपाः। (३) जनार्दन। (४) स्वजनम्।—(१) जनानां संसद् जनसंसद्, तस्याम् जनसंसदि। (२) जनानां अधिपाः जनाधिपाः। (३) (विग्रहपद्धत्यै 'अर्दन' शब्दो द्रष्टव्यः)। (४) स्वस्य (आत्मनः) जनः स्वजनः, तम् स्वजनम्।

370. **जनक**—जनकादयः—जनकः आदिः येषां ते।

371. **जन्म**—(१) पुनर्जन्म। (२) सदसद्योनिजन्मसु।—(१) पुनः जन्म पुनर्जन्म। (२) सदसद्योनिषु (सदः असदश्च योनयः सदसद्योनयः, तासु) जन्मानि सदसद्योनिजन्मानि, तेषु सदसद्योनिजन्मसु।

372. **जन्मकर्मफल**—जन्मकर्मफलप्रदाम्—जन्मकर्मफलं [जन्म एव कर्मफलं (कर्मणः फलं)] या प्रददाति सा जन्मकर्मफलप्रदा, ताम्; अथवा या जन्मकर्मफलं (जन्म येन भवति तादृशं कर्म यस्य फलं) या प्रददाति सा जन्मकर्मफलप्रदा, ताम् जन्मकर्म-फलप्रदाम्।

373. **जन्मबन्ध**—जन्मबन्धविनिर्मुक्ताः।—जन्मबन्धात् (जन्म एव बन्धः तस्मात्) विनिर्मुक्ताः।

374. **जन्ममृत्युजरा**—जन्ममृत्युजरादुःखैः—जन्ममृत्युजराः (जन्म च मृत्युश्च जरा च) एव दुःखानि जन्ममृत्युजरादुःखानि तैः। श्रीशङ्करानुमतविग्रहस्तु जन्म च मृत्युश्च जरा च दुःखानि च, जन्ममृत्युजरादुःखानि, तैः इति।

375. **जन्ममृत्युजराव्याधिदुःखदोष**—जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम्—(विग्रहपद्धत्यै 'अनुदर्शन' शब्दो द्रष्टव्यः)।

376. **जप**—जपयज्ञः—जपात्मकः यज्ञः

377. **जय**—जयाजयौ—जयः च अजयः (न जयः, पराजयः) च।

378. **जरामरण**—जरामरणमोक्षाय—जरामरणयोः (जरा च मरणं च तयोः) मोक्षः जरामरण-मोक्षः, तस्मै।

379. **जस्र**—अजस्रम्—न जस्रं (अन्तरं) यस्मिन् तत् (निरन्तरम्)।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



380. **जात**—(१) अजम् । (२) अजः । (३) अज्ञानजम् । (४) आत्मबुद्धिप्रसादजम् । (५) कर्मजम् । (६) कर्मजा । (७) कर्मजान् । (८) नित्यजातम् । (९) प्रकृतिजान् । (१०) प्रकृतिजैः । (११) संस्पर्शजाः । (१२) सहजम् । (१३) स्वभावजम् । (१४) स्वभावजा । (१५) स्वभावजेन ।—( १-२ ) न कश्चित् जातः इति अजः; तम् अजम् । ( ३-७ ) [विग्रहपद्धतिभ्यः 'अज्ञान' (१), 'आत्मबुद्धिप्रसाद', 'कर्मन्' (७-९) शब्दाः क्रमेण द्रष्टव्याः] । ( ८ ) नित्यं जातम् नित्यजातम् । ( ९-१० ) प्रकृतेः जाताः प्रकृतिजाः, तान् प्रकृतिजान्; तैः प्रकृतिजैः । ( ११ ) संस्पर्शात् जाताः संस्पर्शजाः । ( १२ ) सह (जन्मना सह) जातम् सहजम् । ( १३-१५ ) स्वभावात् जातम् स्वभावजम्; तेन स्वभावजेन; स्वभावात् जाता स्वभावजा ।

381. **जाति**—जातिधर्माः—जातीनां (वर्णानां) धर्माः ।

382. **जानत्**—(१) अजानता । (२) अजानन्तः ।—( १ ) न जानाति इति अजानत्; तेन अजानता । (२) न जानन्ति इति अजानन्तः ।

383. **जि (जय्)**—(१) धनञ्जय । (२) धनञ्जयः । (३) समितिंजयः ।—( १-२ ) धनं येन् जितम् सः धनञ्जयः (अर्जुनः); । संबोधने विसर्गलोपः । ( ३ ) समितिं जयति इति समितिंजयः ।

384. **जित**—(१) जितसङ्गदोषाः । (२) जितात्मनः । (३) जितात्मा । (४) जितेन्द्रियः । (५) पुरुजित् ।—( १ ) जिताः सङ्गदोषाः (सङ्गात् ये जायन्ते ते दोषाः) यैः ते जितसङ्गदोषाः । ( २-४ ) [विग्रहपद्धतिभ्यः 'आत्मन्' (२१-२२), 'इन्द्रिय' (१२) शब्दाः क्रमेण द्रष्टव्याः] । ( ५ ) पुरवः जिताः येन (पूर्वस्मिन् सङ्ग्रामे) सः पुरुजित् ।

385. **जीव**—(१) जीवभूतः । (२) जीवभूताम् । (३) जीवलोके ।—( १-२ ) जीवः भूतः (जीवत्वं येन स्वीकृतम् सः) जीवभूतः; जीवभूता जीवस्वरूपा, ताम् जीवभूताम् । ( ३ ) जीवाः (प्राणिनः) यस्मिन् लोके वसन्ति सः जीवलोकः, तस्मिन् जीवलोके ।

386. **जीवित**—त्यक्तजीविताः—त्यक्तं जीवितं यैः ते ।

387. **जेतृ**—जेतासि—[विग्रहपद्धत्यै 'अस्' (२) शब्दो द्रष्टव्यः] ।

388. **ज्ञ**—(१) अज्ञः । (२) अज्ञानाम् ।—( १-२ ) न जानाति इति अज्ञः; 'अज्ञानाम्' इति षष्ठ्याः बहुवचनम् ।

389. **ज्ञा**—(१) क्षेत्रज्ञम् (२) क्षेत्रज्ञः—(१-२) [विग्रहपद्धत्यै 'क्षेत्र' (४-५) शब्दौ द्रष्टव्यौ] ।

390. **ज्ञान**—(१) अज्ञानम् । (२) अज्ञानेन । (३) अपहृतज्ञानाः । (४) ज्ञानगम्यम् । (५) ज्ञानचक्षुषः । (६) ज्ञानचक्षुषा । (७) ज्ञानतपसा । (८) ज्ञानदीपिते । (९) ज्ञानदीपेन । (१०) ज्ञाननिर्धूतकल्मषाः । (११) ज्ञानप्लवेन । (१२) ज्ञानयज्ञः । (१३) ज्ञानयज्ञेन । (१४) ज्ञानयोगेन । (१५) ज्ञानसङ्गेन । (१६) ज्ञानसंछिन्नसंशयम् । (१७) ज्ञानाग्निः । (१८) ज्ञानावस्थितचेतसः । (१९) ज्ञानासिना । (२०) मोघज्ञानाः । (२१) हृतज्ञानाः ।—( १-२ ) न ज्ञानम् अज्ञानम्; तेन अज्ञानेन । ( ३-६ ) [विग्रहपद्धतिभ्यः 'अपहृत' (२), 'गम्य', 'चक्षुष्' (१-२) शब्दाः क्रमेण द्रष्टव्याः] । ( ७ ) ज्ञानं एव तपः ज्ञानतपः, तेन ज्ञानतपसा । (८) ज्ञानेन दीपितः (प्रज्वालितः) ज्ञानदीपितः,



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तस्मिन् ज्ञानदीपिते । ( ९ ) ज्ञानं एव दीपः ज्ञानदीपः, तेन ज्ञानदीपेन । ( १० ) ज्ञानेन निर्धूतकल्मषाः (निर्धूतं कल्मषं यैः ते)। ( ११ ) ज्ञानं एव प्लवः ज्ञानप्लवः, तेन ज्ञानप्लवेन । ( १२–१३ ) ज्ञानं एव यज्ञः ज्ञानयज्ञः, तेन ज्ञानयज्ञेन । ( १४ ) ज्ञानं एव योगः, ज्ञानेन योगः वा, ज्ञानयोगः; तेन ज्ञानयोगेन । ( १५ ) ज्ञानस्य सङ्गः ज्ञानसङ्गः, तेन ज्ञानसङ्गेन । ( १६ ) ज्ञानेन संछिन्नसंशयः (संछिन्नाः संशयाः यस्य सः) ज्ञानसंछिन्नसंशयः, तम् ज्ञानसंछिन्नसंशयम् । ( १७–१९ ) [विग्रहपद्धतिभ्यः 'अग्नि' (३), 'अवस्थित', 'असि' शब्दाः क्रमेण द्रष्टव्याः] । ( २० ) मोघं (निरर्थकं) ज्ञानं येषां ते मोघज्ञानाः । ( २१ ) हृतं ज्ञानं येषां ते हृतज्ञानाः ।

391. **ज्ञानयोग**—ज्ञानयोगव्यवस्थितिः ।—ज्ञानयोगे (ज्ञानं एव योगः, ज्ञानेन योगः वा, ज्ञानयोगः, तस्मिन्) व्यवस्थितिः ।

392. **ज्ञानविज्ञान**—ज्ञानविज्ञाननाशनम्—ज्ञानविज्ञानयोः (ज्ञानं च विज्ञानं च तयोः) नाशनम् (नाशकारणम्) ।

393. **ज्ञानविज्ञानतृप्त**—ज्ञानविज्ञानतृप्तात्मा—[विग्रहपद्धत्यै 'आत्मन्' (२३) शब्दो द्रष्टव्यः]।

394. **ज्ञानाग्नि**—ज्ञानाग्निदग्धकर्माणम्—ज्ञानाग्निना (ज्ञानं एव अग्निः ज्ञानाग्निः, तेन) दग्धकर्मा (दग्धं कर्म यस्य सः) ज्ञानाग्निदग्धकर्मा, तम् ।

395. **ज्योतिस्**—अन्तर्ज्योतिः—[विग्रहपद्धत्यै 'अन्तर्' (३) शब्दो द्रष्टव्यः] ।

396. **ज्वर**—विगतज्वरः—विगतः ज्वरः यस्मात् सः ।

## त

397. **तत्त्व**—(१) तत्त्वदर्शिनः । (२) तत्त्वदर्शिभिः । (३) तत्त्ववित् ।—( १–२ ) तत्त्वं यैः दृश्यते ते तत्त्वदर्शिनः, तैः तत्त्वदर्शिभिः । ( ३ ) तत्त्वं यः वेत्ति सः तत्त्ववित् ।

398. **तत्त्वज्ञानार्थ**—तत्त्वज्ञानार्थदर्शनम्—तत्त्वज्ञानार्थस्य [तत्त्वज्ञानस्य (तत्त्वस्य ज्ञानम् तत्त्वज्ञानम्, तस्य) अर्थः (फलं, प्रयोजनं वा) तत्त्वज्ञानार्थः, तस्य] दर्शनम् (आलोचनम्)।

399. **तत्त्वार्थ**—अतत्त्वार्थवत्—न तत्त्वार्थवत् (तत्त्वमयः यः अर्थः तद्वत्)।

400. **तथा**—तथापि—तथा सति अपि ।

401. **तद्**—(१) तत्परम् । (२) तत्परः । (३) तत्परायणाः । (४) तत्प्रसादात् । (५) तत्समक्षम् । (६) तदनन्तरम् । (७) तदर्थम् । (८) तदर्थीयम् । (९) तदात्मानः । (१०) तद्बुद्धयः । (११) तद्विदः । (१२) तन्निष्ठाः ।—( १–२ ) तस्य परम्, परः वा, तत्परम्, तत्परः, वा । ( ३ ) तदेव परायणं (परं अयनं) येषां भवति ते तत्परायणाः । ( ४ ) तस्य प्रसादः तत्प्रसादः, तस्मात् तत्प्रसादात् । ( ५ ) तस्य (?) समक्षम् तत्समक्षम् । (श्रीशङ्करस्तु 'तत्' शब्दः क्रियाविशेषणार्थः 'तथा' शब्दस्य अर्थेन प्रयुक्तः इति मनुते)। ( ६–९ ) [विग्रहपद्धतिभ्यः 'अनन्तर', 'अर्थ' (१३), 'अर्थीय', 'आत्मन्' (२४) शब्दाः क्रमेण द्रष्टव्याः] । ( १० ) तस्मिन् (गता अनुस्यूता



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वा) येषां बुद्धयः ते तद्बुद्धयः। (११) तौ (क्षेत्रक्षेत्रज्ञौ) ये विदन्ति ते तद्विदः। (१२) तस्मिन् निष्ठा (अभिनिवेशः) येषां ते तन्निष्ठाः।

402. **तद्भाव**—तद्भावभावितः—तद्भावः (तस्मिन्भावः) भावितः (स्मर्यमाणतया अभ्यस्तः) येन सः।

403. **तन्द्रित**—अतन्द्रितः—न तन्द्रितः (तन्द्रया अभिभूतः)।

404. **तपस्**—(१) ज्ञानतपसा। (२) तपोयज्ञाः। (३) यज्ञतपसाम्। (४) यज्ञतपःक्रियाः। (५) यज्ञदानतपःकर्मः। (६) यज्ञदानतपःक्रियाः।—(१) [विग्रहपद्धत्यै 'ज्ञान' (७) शब्दो दृष्टव्यः]। (२) तपांसि यज्ञाः येषां ते तपोयज्ञाः। (३) यज्ञानां तपसां च यज्ञतपसाम्। (४-६) [विग्रहपद्धतिभ्यः 'क्रिया' (४), 'कर्मन्' (३७), 'क्रिया' (५) शब्दाः क्रमेण दृष्टव्याः]।

405. **तपस्क**—अतपस्काय—न तपस्कः (तपःपरायणः) अतपस्कः, तस्मै।

406. **तप्**—(१) परंतप; (२) परंतपः—(१-२) परान् (विपक्षीभूतान्) तापयति इति परंतपः। संबोधने विसर्गलोपः।

407. **तमस्**—तमोद्वारैः—तमसः (नरकस्य, दुःखमोहात्मकस्य) द्वाराणि तमोद्वाराणि, तैः।

408. **तामस**—तामसप्रियम्—तामसस्य (तमःप्रधानप्रकृतेः) प्रियम्।

409. **तीक्ष्ण**—कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः।—(विग्रहपद्धत्यै 'अत्युष्ण' शब्दो दृष्टव्यः)।

410. **तुल्य**—(१) तुल्यनिन्दात्मसंस्तुतिः। (२) तुल्यनिन्दास्तुतिः। (३) तुल्यप्रियाप्रियः।—(१) (विग्रहपद्धत्यै 'आत्मसंस्तुति' शब्दो दृष्टव्यः)। (२) तुल्ये निन्दा च स्तुतिश्च यस्य दृष्टया सः तुल्यनिन्दास्तुतिः। (३) (विग्रहपद्धत्यै 'अप्रिय' शब्दो दृष्टव्यः)।

411. **तृप्त**—(१) आत्मतृप्तः। (२) नित्यतृप्तः।—(१) [विग्रहपद्धत्यै 'आत्मन्' (७) शब्दो दृष्टव्यः]। (२) नित्ये (सर्वकाले) तृप्तः नित्यतृप्तः।

412. **तृष्णासङ्ग**—तृष्णासङ्गसमुद्भवम्—तृष्णासङ्गात् (तृष्णायाः, तृष्णया वा, सङ्गः तृष्णासङ्गः, तस्मात्) समुद्भवः यस्य तत्।

413. **तेजस्**—(१) तेजोराशिम्। (२) स्वतेजसा।—तेजसः राशिः तेजोराशिः, तम् तेजोराशिम्। (२) स्वस्य (आत्मनः) तेजः स्वतेजः, तेन स्वतेजसा।

414. **तेजोंश**—तेजोंशसम्भवम्—तेजोंशात् (तेजसः अंश तेजोंशः, तस्मात्) सम्भवः यस्य तत्।

415. **त्यक्त**—(१) त्यक्तजीविताः (२) त्यक्तसर्वपरिग्रहः—(१) (विग्रहपद्धत्यै 'जीवित' शब्दो दृष्टव्यः)। (२) त्यक्तः सर्वपरिग्रहः (सर्वेषां वस्तूनां परिग्रहः) येन सः त्यक्तसर्वपरिग्रहः।

416. **त्याग**—(१) कर्मफलत्यागः। (२) त्यागफलम्। (३) सर्वकर्मफलत्यागम्।—(१) [विग्रहपद्धत्यै 'कर्मफल' (१) शब्दः दृष्टव्यः]। (२) त्यागस्य (त्यागात् संभवनीयम्) फलम् त्यागफलम्। (३) सर्वकर्मफलानां (सर्वेषां कर्मणां फलानि सर्वकर्मफलानि, तेषां) त्यागः सर्वकर्मफलत्यागः, तम् सर्वकर्मफलत्यागम्।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



417. **त्यागिन्**—(१) अत्यागिनाम् । (२) कर्मफलत्यागी ।—( १ ) न त्यागिनः अत्यागिनः, तेषाम् अत्यागिनाम् । ( २ ) [विग्रहपद्धत्यै 'कर्मफल' (२) शब्दः द्रष्टव्यः] ।

418. **त्रय**—(१) लोकत्रयम् । (२) लोकत्रये ।—( १-२ ) त्रयाणां लोकानां समाहारः लोकत्रयम् । तस्मिन् लोकत्रये ।

419. **त्रयी**—त्रयीधर्मम्—त्रय्या (वेदत्रयेन) विहितः धर्मः त्रयीधर्मः (कर्मानुष्ठानम्), तम् त्रयीधर्मम् ।

420. **त्रि**—(१) त्रिधा । (२) त्रिविधम् । (३) त्रिविधः । (४) त्रिविधा । (५) त्रैधर्म्यम् । (६) त्रैविद्याः—( १ ) त्रिभिः रीतिभिः त्रिधा। (२-४) त्रयो विधाः यस्य, सः त्रिविधः; तत् त्रिविधम्; त्रयः विधाः यस्याः सा त्रिविधा । ( ५ ) त्रयीषु ये धर्माः तद्वत्त्वम् त्रैधर्म्यम् । त्रयाणां होत्रादीनां वेदत्रयविहितानां धर्माणां समाहारः त्रिधर्मम्, तदेव त्रैधर्म्यम् इति तु आनन्दगिरिः । ( ६ ) तिस्रः विद्याः (ऋग्यजुःसामाः) ये अधीयन्ते, विदन्तीति वा, ते त्रैविद्याः ।

421. **त्रैगुण्य**—(१) त्रैगुण्यविषयाः, (२) निस्त्रैगुण्यः—( १ ) त्रैगुण्यं (त्रयाणां गुणानां कर्मफलसम्बन्धलक्षणः समाहारः) विषयः येषां ते त्रैगुण्यविषयाः । ( २ ) निर्गतं त्रैगुण्यं (त्रिभिः गुणैः सम्बन्धः) यस्मात् सः निस्त्रैगुण्यः (निष्कामः) ।

422. **त्रैलोक्य**—त्रैलोक्यराज्यस्य—त्रैलोक्यस्य (त्रयाणां लोकानां समाहारः त्रैलोक्यम्, तस्य) राज्यम् त्रैलोक्यराज्यम्, तस्य ।

423. **त्वत् (युष्मद्)**—(१) त्वत्प्रसादात् । (२) त्वत्समः । (३) त्वदन्यः । (४) त्वदन्येन ।—( १ ) तव प्रसादः त्वत्प्रसादः, तस्मात् त्वत्प्रसादात् । ( २ ) तव समः त्वत्समः । ( ३-४ ) त्वत्तः अन्यः त्वदन्यः; तेन त्वदन्येन ।

## द

424. **दक्षिण**—(१) अदक्षिणम् । (२) दक्षिणायनम् ।—( १ ) न दीयते दक्षिणा यस्मिन् सः अदक्षिणः, तम् अदक्षिणम् । ( २ ) [विग्रहपद्धत्यै 'अयन' (२) शब्दो द्रष्टव्यः] ।

425. **दग्धकर्मन्**—ज्ञानाग्निदग्धकर्माणम्—(विग्रहपद्धत्यै 'ज्ञानाग्नि' शब्दो द्रष्टव्यः) ।

426. **दम्भ**—(१) दम्भमानमदान्विताः, (२) दम्भार्थम् (३) दम्भाहङ्कारसंयुक्ताः—( १ ) [विग्रहपद्धत्यै 'अन्वित' शब्दो (३) द्रष्टव्यः] । ( २ ) [विग्रहपद्धत्यै 'अर्थ' (१४) शब्दो द्रष्टव्यः] । ( ३ ) [विग्रहपद्धत्यै 'अहङ्कार' (३) शब्दो द्रष्टव्यः] ।

427. **दम्भित्व**—अदम्भित्वम् ।—न दम्भित्वम् (दम्भित्वस्य अभावः) ।

428. **दंष्ट्रा**—दंष्ट्राकरालानि—[विग्रहपद्धत्यै 'कराल' (१) शब्दो द्रष्टव्यः] ।

429. **दर्शन**—(१) तत्त्वज्ञानार्थदर्शनम् । (२) दर्शनकाङ्क्षिणः ।—( १ ) (विग्रहपद्धत्यै 'तत्त्वज्ञानार्थ' शब्दो द्रष्टव्यः) । ( २ ) [विग्रहपद्धत्यै 'काङ्क्षिन्' (१) शब्दो द्रष्टव्यः ] ।

430. **दर्शिन्**—(१) तत्त्वदर्शिनः । (२) तत्त्वदर्शिभिः । (३) समदर्शिनः ।—( १-२ ) [विग्रहपद्धत्यै 'तत्त्व' (१-२) शब्दौ द्रष्टव्यौ) । ( ३ ) समं ये पश्यन्ति ते समदर्शिनः ।

431. **दशन**—दशनान्तरेषु ।—[विग्रहपद्धत्यै 'अन्तर' (२) शब्दो द्रष्टव्यः] ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



432. **दा**—शीतोष्णसुखदुःखदाः—शीतोष्णसुखदुःखानि [शीतोष्णैः (शीतैश्च उष्णैश्च स्पर्शैः) (अन्यमानानि) सुखदुःखानि (सुखानि च दुःखानि च) ये प्रयच्छन्ति ते।

433. **दान**—(१) दानक्रियाः। (२) यज्ञदानतपः कर्म। (३) यज्ञदानतपः क्रियाः।—(१) [विग्रहपद्धत्यै 'क्रिया' शब्दो (२) द्रष्टव्यः]। (२) [विग्रहपद्धत्यै 'कर्मन्' शब्दो (३७) द्रष्टव्यः]। (३) [विग्रहपद्धत्यै 'क्रिया' शब्दो (५) द्रष्टव्यः]।

434. **दारा**—पुत्रदारगृहादिषु—[विग्रहपद्धत्यै 'आदि' (११) शब्दो द्रष्टव्यः]।

435. **दाह्य**—अदाह्यः—न दाह्यः (दहनयोग्यः)।

436. **दिव्य**—दिव्यानेकोद्यतायुधम्—[विग्रहपद्धत्यै 'अनेक' (६) शब्दो द्रष्टव्यः]।

437. **दिव्यगन्ध**—दिव्यगन्धानुलेपनम्—(विग्रहपद्धत्यै 'अनुलेपन' शब्दो द्रष्टव्यः)।

438. **दिव्यमाल्याम्बर**—दिव्यमाल्याम्बरधरम्—दिव्यमाल्याम्बराणि (दिव्यानि माल्यानि अम्बराणि च) येन धृतानि सः दिव्यमाल्याम्बरधरः, तम्।

439. **दिव्याभरण**—अनेकदिव्याभरणम्—[विग्रहपद्धत्यै 'अनेक' (१) शब्दो द्रष्टव्यः]।

440. **दीप**—ज्ञानदीपेन—[विग्रहपद्धत्यै 'ज्ञान' शब्दो (१) द्रष्टव्यः]।

441. **दीपित**—ज्ञानदीपिते—[विग्रहपद्धत्यै 'ज्ञान' (८) शब्दो द्रष्टव्यः]।

442. **दीप्त**—दीप्तविशालनेत्रम्—दीप्तानि विशालानि नेत्राणि यस्य सः दीप्तविशालनेत्रः, तम्।

443. **दीप्तहुताश**—दीप्तहुताशवक्त्रम्—दीप्तहुताशवत् (दीप्तश्चासौ हुताशश्च दीप्तहुताशः तद्वत्) वक्त्रं यस्य सः दीप्तहुताशवक्त्रः, तम्।

444. **दीप्तानलार्क**—दीप्तानलार्कद्युतिम्—दीप्तानलार्कयोः (अनलश्च अर्कश्च अनलार्कौ; दीप्तौ अनलार्कौ दीप्तानलार्कौ; तयोः) इव द्युतिः यस्य सः दीप्तानलार्कद्युतिः, तम्।

445. **दीप्तिमत्**—सर्वतोदीप्तिमन्तम्—सर्वतः दीप्तिमान् सर्वतोदीप्तिमान्, तम्।

446. **दीर्घ**—दीर्घसूत्री—दीर्घं सूत्रयितुं शीलं अस्य इति दीर्घसूत्री।

447. **दुराचार**—सुदुराचारः—सुतरां दुराचारः (दुष्टं आचरणं यस्य सः)।

448. **दुर्ग**—सर्वदुर्गाणि—सर्वाणि दुर्गाणि (विषमस्थानानि, संकटानि वा)।

449. **दुर्दर्श**—सुदुर्दर्शम्—सुतरां दुर्दर्शम् (दुःखेन दृश्यते, दृष्टिपथं याति, इति वा)।

450. **दुर्लभ**—सुदुर्लभः—सुतरां दुर्लभः (दुःखेन लभ्यते इति)।

451. **दुष्कर**—सुदुष्करम्—सुतरां दुष्करम् (दुःखेन क्रियते इति)।

452. **दुष्कृत**—सुकृतदुष्कृते—सुकृतं [सुष्ठु कृतं (सत्कर्म)] च दुष्कृतं [दुष्टं कृतं (दुष्कर्म)] च।

453. **दुष्ट**—(१) दुर्गतिम्; (२) दुर्बुद्धेः; (३) दुर्मतिः; (४) दुर्मेधाः; (५) दुर्योधनः; (६) दुष्कृताम्; (७) दुष्कृतिनः—(१) [विग्रहपद्धत्यै 'गति' (१) शब्दो द्रष्टव्यः]। (२) दुष्टा बुद्धिः यस्य सः दुर्बुद्धिः, तस्य दुर्बुद्धेः। (३) दुष्टा मतिः यस्य सः दुर्मतिः। (४) दुष्टा मेधा येषां ते दुर्मेधाः। (५) दुष्टा युद्धनीतिः यस्य सः दुर्योधनः। (६–७) [विग्रहपद्धतिभ्यां 'कृ' (१३), 'कृतिन्' (१) शब्दौ क्रमेण द्रष्टव्यौ]।

454. **दुह्**—(१) इष्टकामधुक्। (२) कामधुक्।—(१-२) [विग्रहपद्धतिभ्यां 'इष्ट' (३), 'काम' (१०) शब्दौ क्रमेण द्रष्टव्यौ]।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



455. **दुःख**—(१) जन्ममृत्युजरादुःखैः। (२) दुरत्यया। (३) दुरासदम्। (४) दुर्निग्रहम्। (५) दुर्निरीक्ष्यम्। (६) दुर्लभतरम्। (७) दुष्पूरम्। (८) दुष्पूरेण। (९) दुष्प्रापः। (१०) दुःखयोनयः। (११) दुःखसंयोगवियोगम्। (१२) दुःखहा। (१३) दुःखान्तम्। (१४) दुःखालयम्। (१५) सर्वदुःखानाम्। (१६) सुखदुःखानाम्। (१७) सुखदुःखे।—(१–३) [विग्रहपद्धतिभ्यः 'जन्ममृत्युजरा', 'अत्या', 'आसद' शब्दाः क्रमेण द्रष्टव्याः]। (४) दुःखेन निग्रहः क्रियते यस्य तत् दुर्निग्रहम्। (५) दुःखेन यत् निरीक्ष्यते तत् दुर्निरीक्ष्यम्। (६) दुःखेन लभ्यम् दुर्लभम्, दुर्लभस्य अन्यस्य अपेक्षया दुर्लभम्, दुर्लभतरम्। (७–८) दुःखेन यः पूर्यते सः दुष्पूरः, तम् दुष्पूरम्। तेन दुष्पूरेण। (९) दुःखेन यः प्राप्यते सः दुष्प्रापः। (१०) दुःखानां योनयः (उत्पत्तिस्थानानि) दुःखयोनयः। (११) दुःखेन यस्य संयोगवियोगौ (संयोगश्च वियोगश्च) भवतः तत् दुःखसंयोगवियोगम्। (१२) दुःखान् हन्तीति दुःखहा। (१३–१४) [विग्रहपद्धतिभ्यां 'अन्त' (११), 'आलय' (१) शब्दौ क्रमेण द्रष्टव्यौ]। (१५) सर्वेषां दुःखानाम् सर्वदुःखानाम्। (१६) सुखानि च दुःखानि च सुखदुःखानि, तेषां सुखदुःखानाम्। (१७) सुखं च दुःखं च सुखदुःखे।

456. **दुःखशोकामय**—दुःखशोकामयप्रदाः—दुःखशोकामयान् [दुःखशोकाः (दुःखानि च शोकाश्च) एव आमयाः दुःखशोकामयाः, तान्] ये प्रयच्छन्ति ते।

457. **दुःखसुख**—(१) समदुःखसुखम्। (२) समदुःखसुखः।—(१–२) समानि दुःखसुखानि (दुःखानि च सुखानि च) यस्य (मनसि) सः समदुःखसुखः; तम् समदुःखसुखम्।

458. **दूर**—दूरस्थम्—दूरे स्थितम्।

459. **दृढ**—(१) दृढनिश्चयः। (२) दृढव्रताः।—(१) दृढः निश्चयः यस्य सः दृढनिश्चयः। (२) दृढानि व्रतानि येषां ते दृढव्रताः।

460. **दृष्ट**—(१) दृष्टपूर्वम्। (२) विधिदृष्टः।—(१) पूर्वं दृष्टम् दृष्टपूर्वम्। (२) विधिना दृष्टः विधिदृष्टः (विधिवाक्यैः निर्दिष्टः)।

461. **दृष्टपूर्व**—(१) अदृष्टपूर्वम्। (२) अदृष्टपूर्वाणि।—(१–२) यत् पूर्वं न दृष्टं तत् अदृष्टपूर्वम्। यानि...न दृष्टानि तानि अदृष्टपूर्वाणि।

462. **देव**—(१) अधिदैवम्। (२) आदिदेवम्। (३) आदिदेवः। (४) देवदेव। (५) देवदेवस्य। (६) देवद्विजगुरुप्राज्ञपूजनम्। (७) देवभोगान्। (८) देवयजः। (९) देवर्षिः। (१०) देवर्षीणाम्। (११) देववर। (१२) देवव्रताः। (१३) देवेश।—(१–३) [विग्रहपद्धतिभ्यः 'अधि' (२), 'आदि' (६–७) शब्दाः क्रमेण द्रष्टव्याः]। (४–५) देवानां देवः देवदेवः; तस्य देवदेवस्य। संबोधने विसर्गलोपः। (६) (विग्रहपद्धत्यै 'गुरु' शब्दो द्रष्टव्यः)। (७) देवानां भोगाः देवभोगाः, तान् देवभोगान्। (८) देवान् ये यजन्ति ते देवयजः। (९–१०) [विग्रहपद्धतिभ्यां 'ऋषि' (१–२) शब्दौ क्रमेण द्रष्टव्यौ]। (११) देवानां वरः देववरः; संबोधने विसर्गलोपः। (१२) देवानां तुष्ट्ये ये व्रतानि आचरन्ति ते देवव्रताः। (१३) [विग्रहपद्धत्यै 'ईश' (४) शब्दो द्रष्टव्यः]



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



463. **देवता**—(१) अधिदैवतम् (२) अन्यदेवताः—[विग्रहपद्धतिभ्यां 'अधि' (१), 'अन्य' (४) शब्दौ क्रमेण द्रष्टव्यौ]।

464. **देश**—ह्रद्देशे—ह्रत् एव देशः, ह्रदः देशः वा, ह्रद्देशः, तस्मिन्।

465. **देशकाल**—अदेशकाले—(देशश्च कालश्च एतयोः समाहारः देशकालः), न देशकालः अदेशकालः (अविहितदेशकालः), तस्मिन्।

466. **देह**—(१) आत्मपरदेहेषु। (२) देहभृत्। (३) देहभृता। (४) देहभृताम्। (५) देहसमुद्भवान्।—(१) [विग्रहपद्धत्यै 'आत्मन्' (८) शब्दो द्रष्टव्यः]। (२-४) देहं बिभर्ति इति देहभृत्; तेन देहभृता; 'देहभृताम्' इति षष्ठ्याः बहुवचनम्। (५) देहात् समुद्भवः येषां ते देहसमुद्भवाः, तान् देहसमुद्भवान्।

467. **देहान्तर**—देहान्तरप्राप्तिः—देहान्तरस्य (अन्यः देहः देहान्तरः, तस्य) प्राप्तिः।

468. **देहिक**—पौर्वदेहिकम्—पूर्वदेहेन (पूर्वो देहः पूर्वदेहः, तेन) यस्य सम्बन्धः तत्।

469. **देहिन्**—सर्वदेहिनाम्—सर्वेषां देहिनाम्।

470. **दोष**—(१) निर्दोषम्। (२) सदोषम्।—(१) निर्गतः दोषः यस्मात्, न विद्यते दोषः यस्मिन् वा, तत् निर्दोषम्। (२) दोषेण सहितम् सदोषम्।

471. **दौर्बल्य**—हृदयदौर्बल्यम्—हृदयस्य, हृदये स्थितं वा, दौर्बल्यम् (दूषितं बलं यस्य सः दुर्बलः, तस्य भावः)

472. **द्युति**—दीप्तानलार्कद्युतिम्—(विग्रहपद्धत्यै 'दीप्तानलार्क' शब्दो द्रष्टव्यः)।

473. **द्यौ**—द्यावापृथिव्योः—द्यौः पृथिवी च द्यावापृथिव्यौ, तयोः।

474. **द्रव्य**—द्रव्ययज्ञाः—द्रव्यमयाः (द्रव्याणि येषु हूयन्ते ते) यज्ञाः।

475. **द्रुपद**—द्रुपदपुत्रेण—द्रुपदस्य पुत्रः द्रुपदपुत्रः, तेन।

476. **द्रोण**—भीष्मद्रोणप्रमुखतः—भीष्मः द्रोणश्च येषु प्रमुखत्वेन स्थितौ (तान्कुरून् पश्य)।

477. **द्रोह**—(१) अद्रोहः। (२) मित्रद्रोहे।—(१) न द्रोहः (द्रोहस्य अभावः)। (२) मित्रस्य द्रोहः मित्रद्रोहः, तस्मिन् मित्रद्रोहे।

478. **द्वन्द्व**—(१) द्वन्द्वमोहेन। (२) द्वन्द्वातीतः। (३) निर्द्वन्द्वः।—(१) द्वन्द्वाज्जातः मोहः द्वन्द्वमोहः, तेन द्वन्द्वमोहेन। (२) [विग्रहपद्धत्यै 'अतीत' (२) शब्दः द्रष्टव्यः]। (३) निर्गताः द्वन्द्वाः यस्मात् सः निर्द्वन्द्वः।

479. **द्वन्द्वमोह**—द्वन्द्वमोहनिर्मुक्ताः—द्वन्द्वमोहात् (द्वन्द्वाज्जातः मोहः द्वन्द्वमोहः, तस्मात्) निर्मुक्ताः।

480. **द्वार**—(१) तमोद्वारैः। (२) नवद्वारे। (३) सर्वद्वाराणि। (४) सर्वद्वारेषु। (५) स्वर्गद्वारम्।—(१) तमसः द्वाराणि तमोद्वाराणि, तैः तमोद्वारैः। (२) नवद्वाराणि यस्य, यस्मिन् वा, सः नवद्वारः, तस्मिन् नवद्वारे। (३-४) सर्वाणि द्वाराणि सर्वद्वाराणि; तेषु सर्वद्वारेषु। (५) स्वर्गस्य द्वारम् स्वर्गद्वारम्।

481. **द्वि**—द्विविधा—द्वे विधे यस्याः सा।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



482. **द्विज**—(१) देवद्विजगुरुप्राज्ञपूजनम्। (२) द्विजोत्तम।—(१-२) [विग्रहपद्धतिभ्यां 'गुरु', 'उत्तम' (६) शब्दौ क्रमेण द्रष्टव्यौ]।

483. **द्विधाभाव**—छिन्नद्वैधाः—छिन्नः द्विधाभावः येभ्यः, यैः वा, ते।

484. **द्वेष**—रागद्वेषौ—रागश्च असौ द्वेषश्च।

485. **द्वेष्टृ**—अद्वेष्टा—न द्वेष्टा (अन्यस्य द्वेषं करोति इति)।

486. **द्वेष्य**— सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु— [विग्रहपद्धत्यै 'अरि' (३) शब्दो द्रष्टव्यः]।

## ध

487. **धन**—(१) धनञ्जय। (२) धनञ्जयः। (३) धनमानमदान्विताः।—(१-२) [विग्रहपद्धतिभ्यां 'जि(जय्)' (१-२) शब्दौ द्रष्टव्यौ]। (३) [विग्रहपद्धत्यै 'अन्वित' (४) शब्दो द्रष्टव्यः]।

488. **धनुस्**—धनुर्धरः—धनुः धारयतीति।

489. **धर्म**—(१) अधर्मस्य। (२) अधर्मम्। (३) अधर्मः। (४) कुलधर्माः। (५) जातिधर्माः। (६) त्रयीधर्मम्। (७) त्रैधर्म्यम्। (८) धर्मकामार्थान्। (९) धर्मक्षेत्रे। (१०) धर्मसंमूढचेताः। (११) धर्मसंस्थापनार्थाय। (१२) धर्मात्मा। (१३) धर्माविरुद्धः। (१४) परधर्मः। (१५) परधर्मात्। (१६) सर्वधर्मान्। (१७) साधर्म्यम्। (१८) स्वधर्मम्। (१९) स्वधर्मः। (२०) स्वधर्मे।—(१-३) न धर्मः अधर्मः; तम् अधर्मम्; तस्य अधर्मस्य। (४-९) [विग्रहपद्धतिभ्यः 'कुल' (३), 'जाति', 'त्रयी', 'त्रि' (५), 'अर्थ' (१५), 'क्षेत्र' (६), शब्दाः अनुक्रमेण द्रष्टव्याः]। (१०) धर्मेण संमूढचेताः (संमूढं चेतः यस्य सः) धर्मसंमूढचेताः। (११) धर्मस्य संस्थापनं (एव) अर्थः धर्मसंस्थापनार्थः, तस्मै धर्मसंस्थापनार्थाय। (१२-१३) [विग्रहपद्धत्यै 'आत्मन्' (२५) 'अविरुद्ध' शब्दौ अनुक्रमेण द्रष्टव्यौ]। (१४-१५) परेषां धर्मः परधर्मः; तस्मात् परधर्मात्। (१६) सर्वे धर्माः सर्वधर्माः, तान् सर्वधर्मान्। (१७) समानाः धर्माः समानधर्माः, तेषां भावः साधर्म्यम्। (१८-२०) स्वस्य (आत्मनः, कुलस्य, जातेः वा) धर्मः स्वधर्मः; तम् स्वधर्मम्; तस्मिन् स्वधर्मे।

490. **धर्म्य**—धर्म्यामृतम्—[विग्रहपद्धत्यै 'अमृत' (३) शब्दो द्रष्टव्यः]।

491. **धा**—(१) अष्टधा। (२) त्रिधा। (३) बहुधा।—(१-२) [विग्रहपद्धतिभ्यां 'अष्ट' 'त्रि' (१) शब्दौ क्रमेण द्रष्टव्यौ]। (३) बहुभिः रीतिभिः, प्रकारैः वा, बहुधा।

492. **धारणा**—योगधारणाम्—योगाय कृता, योगस्य अङ्गीभूता वा, धारणा योगधारणा, ताम्।

493. **धी**—स्थितधीः—स्थिता (दृढीभूता) धीः (प्रज्ञा) यस्य सः।

494. **धृ**—(१) दिव्यमाल्याम्बरधरम्। (२) धनुर्धरः।—(१-२) [विग्रहपद्धतिभ्यां 'दिव्यमाल्याम्बर', 'धनुस्', शब्दौ क्रमेण द्रष्टव्यौ]।

495. **धृति**—(१) धृतिगृहीतया। (२) धृत्युत्साहसमन्वितः।—(१-२) [विग्रहपद्धतिभ्यां 'गृहीत', 'उत्साह' शब्दौ क्रमेण द्रष्टव्यौ]।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



496. **ध्यानयोग**—ध्यानयोगपरः—(ध्यानं एव योगः, ध्यानेन वा योगः) ध्यानयोगः, तस्मिन् तत्परः (तत्परत्वेन कर्तव्यं यस्य सः) ध्यानयोगपरः। श्रीशङ्करस्तु ध्यानं (आत्मस्वरूपचिन्तनं) योगः (आत्मस्वरूपविषये एव एकाग्रीकरणं) च, तौ ध्यानयोगौ परत्वेन कर्तव्यौ यस्य सः इति।

497. **ध्वज**—कपिध्वजः—(विग्रहपद्धत्यै 'कपि' शब्दो द्रष्टव्यः)।

498. **ध्रुव**—अध्रुवम्—न ध्रुवम् (अस्थिरम्)।

न

499. **न***—Nos. of the Primary Compound Word-Units having this as one of its component parts :—1, 2, 3, 4, 5, 6, 8, 10, 11, 13, 14, 15, 16, 17, 18, 19, 20, 21, 22, 23, 25, 26, 27, 28, 30, 37, 39, 40, 41, 42, 43, 44, 45, 46, 47, 48, 49, 50, 51, 52, 53, 54, 55, 56, 57, 62, 63, 64, 67, 68, 69, 85, 92, 93, 94, 95, 96, 97, 100, 101, 103, 104, 105, 128, 129, 130, 132, 138, 139, 140, 141, 142, 143, 144, 145, 147, 148, 149, 150, 151, 152, 156, 157, 158, 159, 160, 161, 162, 163, 164, 165, 166, 167, 168, 169, 170, 171, 172, 173, 174, 175, 176, 177, 178, 179, 180, 181, 182, 183, 187, 188, 189, 190, 191, 216, 252, 259, 261, 262, 263, 264, 265, 266, 267, 268, 269, 270, 274, 279, 280, 282, 284, 285, 286, 287, 288, 289, 290, 291, 292, 294, 295, 296, 298, 299, 301, 302, 303, 338, 339, 343, 344, 345, 346, 349, 355, 356, 357, 359, 361, 362, 363, 364, 365, 383, 392, 394, 395, 396, 406, 414, 415, 416, 417, 418, 419, 420, 421, 422, 423, 429, 430, 431, 432, 435, 436, 437, 438, 439, 440, 442, 443, 444, 445, 446, 447, 448, 449, 450, 451, 452, 453, 454, 455, 456, 457, 458, 459, 465, 466, 467, 477, 478, 480, 482, 483, 486, 488, 489, 490, 491, 492, 493, 494, 495, 498, 499, 500, 504, 514, 515, 524, 525, 526, 1779, 1784.

500. **नन्दन**—कुरुनन्दन—[विग्रहपद्धत्यै 'कुरु' (२) शब्दो द्रष्टव्यः]।

501. **नभस्**—नभःस्पृशम्—नभः स्पृशति इति नभःस्पृशः, तम्।

---

* In the case of this secondary word-unit, the entry Nos. of the primary compound word-units, of which it forms a part, are alone cited here, as no useful purpose would be served by repeating more than 200 units. Their methods of dissolution have been shown as against the respective other members of the compound words forming those units because I consider those places more appropriate for doing so.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



502. **नमस्**—नमोनमः—नमः नमः (पुनः पुनर्नमनम्)।

503. **नर**—(१) नरपुङ्गव। (२) नराधमान्। (३) नराधमाः (४) नराधिपम्।—(१) नरेषु, नराणां वा, पुङ्गवः (श्रेष्ठः) नरपुङ्गवः। (२–४), [विग्रहपद्धतिभ्यः 'अधम' (१–२) 'अधिप' (२) शब्दाः क्रमेण द्रष्टव्याः]।

504. **नरलोक**—नरलोकवीराः—नरलोके (नराणां लोकः नरलोकः, तस्मिन्) वीराः (वीरपुरुषाः)।

505. **नव**—नवद्वारे—[विग्रहपद्धत्यै 'द्वार' (२) शब्दो द्रष्टव्यः]।

506. **नष्ट**—नष्टात्मानः—[विग्रहपद्धत्यै 'आत्मन्' (२६) शब्दो द्रष्टव्यः]।

507. **नाद**—सिंहनादम्—सिंहस्य इव नादः सिंहनादः, तम्।

508. **नाना**—(१) नानाभावान्। (२) नानावर्णाकृतीनि। (३) नानाविधानि।—(१) नाना (विविधाः) भावाः नानाभावाः; तान् नानाभावान्। (२) (विग्रहपद्धत्यै 'आकृति' शब्दो द्रष्टव्यः)। (३) नाना (विविधाः) विधाः येषां तानि नानाविधानि।

509. **नानाशस्त्र**—नानाशस्त्रप्रहरणाः—नानाशस्त्राणि [नाना (विविधानि) शस्त्राणि] प्रहरन्ति इति।

510. **नाम**—नामयज्ञैः—नाम्ना एव ये यज्ञाः (न वस्तुतः) ते नामयज्ञाः, तैः।

511. **नाश**—(१) अभिक्रमनाशः। (२) बुद्धिनाशः। (३) बुद्धिनाशात्।—(१) अभिक्रमस्य नाशः अभिक्रमनाशः। (२–३) बुद्धेः (विवेकबुद्धेः) नाशः बुद्धिनाशः; तस्मात् बुद्धिनाशात्।

512. **नाशन**—ज्ञानविज्ञाननाशनम्—(विग्रहपद्धत्यै 'ज्ञानविज्ञान' शब्दो द्रष्टव्यः)।

513. **नाशिन्**—अनाशिनः—न नाशिनः (नाशवन्तः, नाशशीलाः वा)।

514. **नासा**—नासाभ्यन्तरचारिणौ—(विग्रहपद्धत्यै 'अभ्यन्तर' शब्दो द्रष्टव्यः)।

515. **नासिका**—नासिकाग्रम्—(विग्रहपद्धत्यै 'अग्र' (३) शब्दो द्रष्टव्यः)।

516. **निकेत**—अनिकेतः—निकेतं न विद्यते यस्य सः।

517. **निग्रह**—दुर्निग्रहम्—(विग्रहपद्धत्यै 'दुःख' (४) शब्दो द्रष्टव्यः)।

518. **नित्य**—(१) अध्यात्मनित्याः। (२) अनित्यम्। (३) अनित्याः। (४) नित्यजातम्। (५) नित्यतृप्तः। (६) नित्ययुक्तस्य। (७) नित्ययुक्तः। (८) नित्ययुक्ताः। (९) नित्यवैरिणा। (१०) नित्यसत्त्वस्थः। (११) नित्यसन्न्यासी। (१२) नित्यसर्वगतस्थाणुः। (१३) नित्याभियुक्तानाम्।—(१) [विग्रहपद्धत्यै 'अध्यात्म' (२) शब्दो द्रष्टव्यः]। (२–३) न नित्यम् अनित्यम्; न नित्याः अनित्याः। (४–५) [विग्रहपद्धतिभ्यां 'जात' (८), 'तृप्त' (२) शब्दौ क्रमेण द्रष्टव्यौ]। (६–८) नित्यं (सदा) युक्तः नित्ययुक्तः; तस्य नित्ययुक्तस्य; ते नित्ययुक्ताः। (९) नित्यं (सर्वकालस्य) वैरिन् नित्यवैरिन्, तेन नित्यवैरिणा। (१०) नित्यं सत्त्वे स्थिताः नित्यसत्त्वस्थाः। (११) नित्यं (सर्वकालस्य) सन्न्यासी नित्यसन्न्यासी। (१२) नित्यः सर्वगतः स्थाणुश्च नित्यसर्वगतस्थाणुः। (१३) (विग्रहपद्धत्यै 'अभियुक्त' शब्दो द्रष्टव्यः)।

519. **नित्यत्व**—अध्यात्मज्ञाननित्यत्वम्—(विग्रहपद्धत्यै 'अध्यात्मज्ञान' शब्दो द्रष्टव्यः)।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



520. **निद्रा**—(१) निद्रालस्यप्रमादोत्थम्। (२) प्रमादालस्यनिद्राभिः।—(१–२) [विग्रहपद्धतिभ्यां 'आलस्य' (१–२) शब्दौ द्रष्टव्यौ]।

521. **निधन**—अव्यक्तनिधनानि—[विग्रहपद्धत्यै 'अव्यक्त' (१) शब्दो द्रष्टव्यः]।

522. **निन्दात्मसंस्तुति**— तुल्यनिन्दात्मसंस्तुतिः— (विग्रहपद्धत्यै 'आत्मसंस्तुति' शब्दो द्रष्टव्यः)।

523. **निन्दास्तुति**—तुल्यनिन्दास्तुतिः—[विग्रहपद्धत्यै 'तुल्य' (२) शब्दो द्रष्टव्यः]।

524. **निमित्त**—निमित्तमात्रम्—निमित्तं मात्रम् (निमित्तं एव)।

525. **नियत**—(१) नियतमानसः। (२) नियतात्मभिः। (३) नियताहाराः। (४) स्वभावनियतम्—(१) नियतं मानसं यस्य सः नियतमानसः। (२–३) [विग्रहपद्धतिभ्यां 'आत्मन्' (२७) 'आहार' (१) शब्दौ क्रमेण द्रष्टव्यौ]। (४) स्वभावेन (स्वस्य भावः स्वभावः, तेन, स्वप्रकृतिना) नियतम् स्वभावनियतम्।

526. **निरत**—स्वकर्मनिरतः—स्वकर्मे (स्वस्य कर्म स्वकर्म, तस्मिन्) निरतः।

527. **निरीक्ष्‌/ईक्ष् + नि**—दुर्निरीक्ष्यम्—[विग्रहपद्धत्यै 'दुःख' शब्दो (५) द्रष्टव्यः]।

528. **निर्गत**—(१) निरग्निः। (२) निरहङ्कारः। (३) निराशीः। (४) निराश्रयः। (५) निराहारस्य। (६) निर्गुणत्वात्। (७) निर्गुणम्। (८) निर्दोषम्। (९) निर्द्वन्द्वः। (१०) निर्ममः। (११) निर्मलत्वात्। (१२) निर्मलम्। (१३) निर्मानमोहाः। (१४) निर्योगक्षेमः। (१५) निर्विकारः। (१६) निर्वैरः। (१७) निस्त्रैगुण्यः। (१८) निःस्पृहः।—(१–९) [विग्रहपद्धतिभ्यः 'अग्नि' (४), 'अहङ्कार' (४), 'आशा' (१), 'आश्रय' (१) 'आहार' (२) 'गुणत्व', 'गुण' (१२), 'दोष' (१), 'द्वन्द्व' (३) शब्दाः क्रमेण द्रष्टव्याः]। (१०) निर्गतं ममत्वं यस्मात् सः निर्ममः। (११–१२) निर्गतः मलः यस्मात् तत् निर्मलम्, तस्य भावः निर्मलत्वम्; तस्मात् निर्मलत्वात्। (१३) निर्गतौ मानमोहभावौ येभ्यः ते निर्मानमोहाः। (१४) निर्गता योगक्षेमस्य (अप्राप्तस्य प्रापणं योगः, प्राप्तस्य रक्षणं क्षेमम्, तयोः समाहारः योगक्षेमम्, तस्य) स्पृहा यस्मात् (यस्य हृदयात्) सः निर्योगक्षेमः। (१५) निर्गतः विकारः यस्मात्सः निर्विकारः। (१६) निर्गतः वैरभावः यस्मात् (यस्य हृदयात्) सः निर्वैरः। (१७) [विग्रहपद्धत्यै 'त्रैगुण्य' (२) शब्दो द्रष्टव्यः]। (१८) निर्गता स्पृहा यस्मात् (यस्य हृदयात्) सः निःस्पृहः।

529. **निर्देश्य**—अनिर्देश्यम्—न निर्देश्यम् (निर्देशयोग्यम्)।

530. **निर्धूतकल्मष**—ज्ञाननिर्धूतकल्मषाः—[विग्रहपद्धत्यै 'ज्ञान' शब्दो (१०) द्रष्टव्यः]।

531. **निर्मुक्त**—द्वन्द्वमोहनिर्मुक्ताः—(विग्रहपद्धत्यै 'द्वन्द्वमोह' शब्दो द्रष्टव्यः)।

532. **निर्वाण**—(१) निर्वाणपरमाम्। (२) ब्रह्मनिर्वाणम्।—(१) निर्वाणं (मोक्षः) परमा निष्ठा यस्याः सा निर्वाणपरमा, ताम्। (२) ब्रह्मणि निर्वाणम् ब्रह्मनिर्वाणम्; तम् ब्रह्मनिर्वाणम् (ब्रह्मणि शान्तिः, ताम्)।

533. **निर्विण्ण**—निर्विण्णचेतसा—[विग्रहपद्धत्यै 'चेतस्' (५) शब्दो द्रष्टव्यः]।

534. **निवात**—निवातस्थः—निवाते (निर्गतः वातः यस्मात् सः निवातः, तस्मिन् देशे) स्थितः।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



535. **निवास**—जगन्निवास—[विग्रहपद्धत्यै 'जगत्' (२) शब्दो द्रष्टव्यः]।

536. **निश्चय**—(१) आसुरनिश्चयान्। (२) कृतनिश्चयः। (३) दृढनिश्चयः।—(१-३) [विग्रहपद्धतिभ्यः 'आसुर', 'कृ' (१०), 'दृढ' (२) शब्दाः क्रमेण द्रष्टव्याः]।

537. **निश्चित**—सुनिश्चितम्—सुष्ठुनिश्चितम् (दृढत्वेन अभिप्रेतम्)।

538. **निषूदन**—केशिनिषूदन—केशिनामदैत्यविशेषः, तस्य निषूदनः (संहर्ता) केशिनिषूदनः; संबोधने विसर्गलोपः।

539. **निष्ठ**—तन्निष्ठाः—[विग्रहपद्धत्यै 'तद्' (१२) शब्दो द्रष्टव्यः]।

540. **निःश्रेयस्**—निःश्रेयसकरौ—[विग्रहपद्धत्यै 'कृ' (१४) शब्दो द्रष्टव्यः]।

541. **नीच**—अतिनीचम्—[विग्रहपद्धत्यै 'अति' (१) शब्दो द्रष्टव्यः]।

542. **नृ**—नृलोके—नृणां लोकः नृलोकः, तस्मिन्।

543. **नेत्र**—(१) दीप्तविशालनेत्रम्। (२) बहुवक्त्रनेत्रम्। (३) शशिसूर्यनेत्रम्।—(१) विग्रहपद्धत्यै 'दीप्त' शब्दो द्रष्टव्यः। (२) बहूनि वक्त्राणि नेत्राणि च यस्य सः बहुवक्त्रनेत्रः, तम् बहुवक्त्रनेत्रम्। (३) शशिसूर्यौ (शशी च सूर्यः च) यस्य नेत्रे भवतः सः शशिसूर्यनेत्रः, तम् शशिसूर्यनेत्रम्।

544. **नैष्कर्म्य**—नैष्कर्म्यसिद्धिम्—नैष्कर्म्यस्य (निर्गतं कर्म यस्याः (स्थितेः सा स्थितिः नैष्कर्म्यं; तस्य) सिद्धिः नैष्कर्म्यसिद्धिः, ताम्।

545. **न्याय**—अन्यायेन—न न्यायः अन्यायः (न्यायस्य विपर्यासः) तेन।

## प

546. **पक्ष**—मित्रारिपक्षयोः—[विग्रहपद्धत्यै 'अरि' (२) शब्दो द्रष्टव्यः]।

547. **पणवानक**—पणवानकगोमुखाः—(विग्रहपद्धत्यै 'गोमुख' शब्दो द्रष्टव्यः)।

548. **पति**—(१) जगत्पते। (२) पृथिवीपते। (३) प्रजापतिः। (४) महीपते।—(१) [विग्रहपद्धत्यै 'जगत्' (१) शब्दो द्रष्टव्यः]। (२) पृथिव्याः पतिः पृथिवीपतिः; पृथिवीपते इति संबोधने। (३) प्रजानां पतिः प्रजापतिः। (४) मह्याः पतिः महीपतिः; महीपते इति संबोधने।

549. **पत्र**—पद्मपत्रम्—पद्मस्य पत्रम्।

550. **पद**—ब्रह्मसूत्रपदैः—ब्रह्मसूत्राणां (ब्रह्मप्रतिपादकानि, ब्रह्मणः सूचकानि वा, सूत्राणि (वेदवाक्यानि) तेषां) पदैः (शब्दैः)।

551. **पद्म**—पद्मपत्रम्—(विग्रहपद्धत्यै 'पत्र' शब्दो द्रष्टव्यः)।

552. **पर**—(१) अपरम्। (२) अपरस्परसम्भूतम्। (३) अपरा। (४) अपराणि। (५) अपरान्। (६) अपरे। (७) आत्मपरदेहेषु। (८) तत्परम्। (९) तत्परः। (१०) ध्यानयोगपरः। (११) परधर्मः। (१२) परधर्मात्। (१३) परंतप। (१४) परंतपः। (१५) मत्परम्। (१६) मत्परः। (१७) मत्पराः। (१८) स्वर्गपराः।—(१, ३, ४-६) न परम् अपरम्; न परा अपरा; न पराणि अपराणि; न पराः अपरे; तान् अपरान्। (२, ७-१४) [विग्रहपद्धतिभ्यः 'अपर', 'आत्मन्' (८), 'तद्' (१-२), 'ध्यानयोग', 'धर्म'



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(१४-१५), 'तद्' (१-२) शब्दाः अनुक्रमेण द्रष्टव्याः] । ( १५-१७ ) अहमेव यस्य परं (परा शक्तिः) तत् मत्परम् (अनादि ब्रह्म) इति रामानुजः; अहं परः (पुरुषार्थः) यस्य सः मत्परः; अहं...येषां ते मत्पराः । ( १८ ) स्वर्ग एव परः (पुरुषार्थः) येषां ते स्वर्गपराः ।

553. **परम**—(१) कामोपभोगपरमाः । (२) निर्वाणपरमाम् । (३) परमात्मा । (४) परमेश्वर । (५) परमेश्वरम् । (६) परमेष्वासः । (७) मत्कर्मपरमः । (८) मत्परमः । (९) मत्परमाः ।—( १-६ ) [विग्रहपद्धतिभ्यः 'कामोपभोग', 'निर्वाण' (१), 'आत्मन्' (२८), 'ईश्वर' (३-४), 'इष्वास' (१) शब्दाः क्रमेण द्रष्टव्याः] । ( ७ ) मत्कर्म (मदर्थं कर्म) यस्य परमः पुरुषार्थः सः मत्कर्मपरमः । ( ८-९ ) अहं परमः (परा गतिः) यस्य सः मत्परमः । मत्परमाः इति प्रथमाबहुवचनम् ।

554. **परम्परा**—परम्पराप्राप्तम्—परम्परया प्राप्तम् ।

555. **पराजित**—अपराजितः—न पराजितः (कदापि) ।

556. **परायण**—(१) कामक्रोधपरायणाः । (२) तत्परायणाः । (३) प्राणायामपरायणाः । (४) मत्परायणः । (५) मोक्षपरायणः । (६) श्रुतिपरायणाः ।—( १-२ ) [विग्रहपद्धतिभ्यां 'काम' (१), 'तद्' (३) शब्दौ क्रमेण द्रष्टव्यौ] । ( ३ ) प्राणायामे [प्राणानां आयामे (निरोधे) ] ये परायणाः (तत्परं अयनं मन्यन्ते, तस्मिन् आसक्तिपूर्वकं प्रवृत्ताः) ते प्राणायामपरायणाः । ( ४ ) मयि (मां प्राप्तुं) यः परायणः सः मत्परायणः । ( ५ ) मोक्षे यःपरायणः सः मोक्षपरायणः । ( ६ ) श्रुत्यां (श्रवणे) ये परायणाः ते श्रुतिपरायणाः ।

557. **परिग्रह**—अपरिग्रहः—न परिग्रहः (परिग्रहस्य अभावः) ।

558. **परिचर्या**—परिचर्यात्मकम्—[विग्रहपद्धतौ 'आत्मक' (१) शब्दो द्रष्टव्यः] ।

559. **परित्यागिन्**—(१) शुभाशुभपरित्यागी । (२) सर्वारम्भपरित्यागी ।—( १ ) शुभाशुभे (शुभं अशुभं च) येन परित्यक्ते सः शुभाशुभपरित्यागी; ( २ ) सर्वारम्भाः (सर्वाः आरम्भाः) येन परित्यक्ताः सः सर्वारम्भपरित्यागी ।

560. **परिमेय**—अपरिमेयाम्—न परिमेया अपरिमेया, ताम् ।

561. **परिहार्य**—अपरिहार्ये—न परिहार्यः अपरिहार्यः, तस्मिन् ।

562. **पर्यन्त**—सहस्रयुगपर्यन्तम्—सहस्रयुगानां (युगानां सहस्रम् सहस्रयुगाः, तेषाम् ) यावदन्तो भवति तावत् ।

563. **पर्याप्त**—अपर्याप्तम्—न पर्याप्तम् ।

564. **पलायन**—अपलायनम्—न पलायनम् (स्थैर्यम् ) ।

565. **पा(पिब्)**—(१) ऊष्मपाः । (२) सोमपाः ।—( १ ) (विग्रहपद्धतौ 'ऊष्म' शब्दो द्रष्टव्यः) । ( २ ) सोमं (सोमरसं) पिबन्ति इति सोमपाः ।

566. **पाणि**—शस्त्रपाणयः—शस्त्राणि पाणिषु येषां ते ।

567. **पाणिपाद**—सर्वतःपाणिपादम्—सर्वतः पाणिपादौ (पाणी च पादौ च) यस्य (शरीरे) सः सर्वतःपाणिपादः, तम् ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



568. **पाण्डव**—पाण्डवानीकम्—पाण्डवानां अनीकम् (सैन्यम्)।

569. **पाण्डु**—पाण्डुपुत्राणाम्—पाण्डोः (धृतराष्ट्रस्य ज्येष्ठभ्राता पाण्डुनामकः, तस्य) पुत्राः पाण्डुपुत्राः, तेषाम्।

570. **पात्र**—अपात्रेभ्यः—न पात्राणि अपात्राणि, तेभ्यः।

571. **पाद**—बहुबाहूरुपादम्—(विग्रहपद्धत्यै 'उरु' शब्दो द्रष्टव्यः)।

572. **पान**—उदपाने—(विग्रहपद्धत्यै 'उदन्' शब्दो द्रष्टव्यः)।

573. **पाप**—(१) पापकृत्तमः। (२) पापयोनयः। (३) पूतपापाः। (४) सर्वपापेभ्यः। (५) सर्वपापैः।—(१) (विग्रहपद्धत्यै 'कृ' (१५) शब्दो द्रष्टव्यः)। (२) पापाः (अधमाः) योनयः (उत्पत्तिस्थानानि) येषां ते पापयोनयः। (३) पापेभ्यः पूताः पूतपापाः। (४-५) सर्वाणि पापानि सर्वपापानि, तेभ्यः सर्वपापेभ्यः; तैः सर्वपापैः।

574. **पाप्मन्**—महापाप्मा—महान् पाप्मा (पापकर्मकृत्)।

575. **पिण्डोदकक्रिया**—लुप्तपिण्डोदकक्रियाः—लुप्ताः पिण्डोदकक्रियाः [पिण्डक्रियाः (पिण्डैः याः क्रियन्ते ताः क्रियाः) उदकक्रियाः (उदकेन याः क्रियन्ते ताः क्रियाः) च] येषां ते।

576. **पितृ**—पितृव्रताः—पितॄणां तुष्टये ये व्रतानि कुर्वन्ति, अनुतिष्ठन्ति वा, ते।

577. **पुण्य**—(१) पुण्यकर्मणाम्। (२) पुण्यकृतान्। (३) पुण्यकृताम्। (४) पुण्यफलम्।—(१-३) [विग्रहपद्धतिभ्यः कर्मन् (३२), 'कृ' (१६-१७) शब्दाः क्रमेण द्रष्टव्याः। (४) पुण्यस्य फलम् पुण्यफलम्।

578. **पुत्र**—(१) कुन्तिपुत्रः। (२) द्रुपदपुत्रेण। (३) पाण्डुपुत्राणाम्। (४) पुत्रदारगृहादिषु। (५) सूतपुत्रः।—(१-४) [विग्रहपद्धतिभ्यः 'कुन्ति', 'द्रुपद', 'पाण्डु', 'आदि' (११) शब्दाः क्रमेण द्रष्टव्याः। (५) सूतस्य (ब्राह्मण्यां क्षत्रियेन उत्पादितः पुरुषः सूतः, तस्य) पुत्रः सूतपुत्रः।

579. **पुनरावृत्ति**—अपुनरावृत्तिम्—न पुनरावृत्तिः (पुनः आवृत्तिः) अपुनरावृत्तिः, ताम्।

580. **पुनर्**—(१) पुनर्जन्म। (२) पुनरावर्तिनः।—(१-२) [विग्रहपद्धतिभ्यां 'जन्म' (१), 'आवर्तिन्' शब्दौ द्रष्टव्यौ]।

581. **पुङ्गव**—नरपुङ्गवः—[विग्रहपद्धत्यै 'नर' (१) शब्दो द्रष्टव्यः]।

582. **पुरु**—पुरुजित्—[विग्रहपद्धत्यै 'जित' (५) शब्दो द्रष्टव्यः)।

583. **पुरुष**—(१) पुरुषर्षभ। (२) पुरुषव्याघ्र। (३) पुरुषोत्तम। (४) पुरुषोत्तमम्। (५) पुरुषोत्तमः।—(१) [विग्रहपद्धत्यै 'ऋषभ' (१) शब्दो द्रष्टव्यः]। (२) पुरुषेषु व्याघ्रः इव पुरुष व्याघ्रः; संबोधने विसर्गलोपः। (३-५) [विग्रहपद्धत्यै 'उत्तम' (७-९) शब्दाः क्रमेण द्रष्टव्याः]।

584. **पूजन**—देवद्विजगुरुप्राज्ञपूजनम्—(विग्रहपद्धत्यै 'गुरु' शब्दो द्रष्टव्यः)।

585. **पूजा**—पूजार्हौ—(विग्रहपद्धत्यै 'अर्ह' शब्दो द्रष्टव्यः)।

586. **पूत**—पूतपापाः—[विग्रहपद्धत्यै 'पाप' (३) शब्दो द्रष्टव्यः]।

587. **पूर**—(१) दुष्पूरम्। (२) दुष्पूरेण।—(१-२) [विग्रहपद्धत्यै दुःख (७-८) शब्दौ द्रष्टव्यौ:]।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



588. **पूर्व**—(१) दृष्टपूर्वम् ; (२) पूर्वाभ्यासेन (३) पौर्वदेहिकम्—( १–३ ) [विग्रहपद्धतिभ्यः 'दृष्ट' (१), 'अभ्यास' (२), 'देहिक' शब्दाः क्रमेण दृष्टव्याः] ।

589. **पूर्वक**—प्रीतिपूर्वकम्—प्रीतिः पूर्वभूमिका यस्यां क्रियापद्धत्यां तया पद्धत्या ।

590. **पृथक्**—(१) पृथग्विधम्; (२) पृथग्विधान् (३) पृथग्विधाः—( १–३ ) पृथक् विधा यस्य तत् पृथग्विधम्; पृथक् विधाः येषां ते पृथग्विधाः; तान् पृथग्विधान् ।

591. **पृथग्भाव**—भूतपृथग्भावम्—भूतानां पृथग्भावः [पृथक् भावः (व्यक्तित्वेन अस्तित्वं)] भूतपृथग्भावः, तम् ।

592. **पृथिवी**—(१) द्यावापृथिव्योः । (२) पृथिवीपते ।—( १–२ ) [विग्रहपद्धतिभ्यां 'द्यौ' 'पति' (२) शब्दौ क्रमेण दृष्टव्यौ] ।

593. **पैशुन**—अपैशुनम्—न पैशुनम् (पररन्ध्रस्य प्रकटीकरणम्)

594. **प्रकाश**—अप्रकाशः—न प्रकाशः (प्रकाशस्य अभावः) ।

595. **प्रकृति**—(१) प्रकृतिजान् । (२) प्रकृतिजैः । (३) प्रकृतिसंभवान् । (४) प्रकृतिसंभवाः; (५) प्रकृतिस्थः; (६) प्रकृतिस्थानि—( १–२ ) [विग्रहपद्धतिभ्यां 'जात' (९–१०) शब्दौ क्रमेण दृष्टव्यौ] । ( ३–४ ) प्रकृतेः येषां संभवः (उत्पत्तिः) भवति ते प्रकृतिसंभवाः, तान् प्रकृतिसंभवान् । ( ५–६ ) प्रकृत्यां स्थितः प्रकृतिस्थः; तस्यां च स्थितानि प्रकृतिस्थानि ।

596. **प्रजा**—प्रजापतिः—[विग्रहपद्धत्यै 'पति' (३) शब्दो दृष्टव्यः] ।

597. **प्रज्ञा**—(१) प्रज्ञावादान् । (२) स्थितप्रज्ञस्य । (३) स्थितप्रज्ञः ।—( १ ) प्रज्ञाप्रेरिताः वादाः प्रज्ञावादाः, तान् प्रज्ञावादान् । ( २–३ ) स्थिता प्रज्ञा यस्य सः स्थितप्रज्ञः; तस्य स्थितप्रज्ञस्य ।

598. **प्रतिकार**—अप्रतिकारम् ।—न प्रतिकारं यः करोति सः अप्रतिकारः, तम् ।

599. **प्रतिष्ठा**—(१) अचलप्रतिष्ठम् । (२) अप्रतिष्ठम् । (३) अप्रतिष्ठः ।—( १ ) (विग्रहपद्धत्यै 'अचल' शब्दो दृष्टव्यः) । ( २–३ ) न प्रतिष्ठा विद्यते यस्य सः अप्रतिष्ठः; न प्रतिष्ठा...यस्य तत् अप्रतिष्ठम् ।

600. **प्रत्यक्ष**—प्रत्यक्षावगमम् ।—प्रत्यक्षं यस्य अवगमो भवति तत् ।

601. **प्रत्युपकार**—प्रत्युपकारार्थम्—[विग्रहपद्धत्यै 'अर्थ' (१६) शब्दो दृष्टव्यः] ।

602. **प्रद √दा + प्र**—(१) जन्मकर्मफलप्रदाम् । (२) दुःखशोकामयप्रदाः । (३) बीजप्रदः ।—( १–२ ) (विग्रहपद्धतिभ्यां 'जन्मकर्मफल', 'दुःखशोकामय' शब्दौ दृष्टव्यौ) । ( ३ ) बीजं यः प्रददाति (निवेशयति) सः ।

603, **प्रदाय √दा + प्र**—अप्रदाय—न प्रदाय ।

604. **प्रदिग्ध**—रुधिरप्रदिग्धान्—रुधिरेण प्रदिग्धाः (कलुषीकृताः) रुधिरप्रदिग्धाः, तान् ।

605. **प्रभव**—(१) सङ्कल्पप्रभवान् । (२) स्वभावप्रभवैः ।—( १ ) सङ्कल्पेभ्यः प्रभवः (उत्पत्तिः) येषां ते सङ्कल्पप्रभवाः, तान् सङ्कल्पप्रभवान् । ( २ ) स्वभावात् प्रभवः (उत्पत्तिः) येषां ते स्वभावप्रभवाः, तैः स्वभावप्रभवैः ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



606. **प्रभाव**—(१) अप्रतिमप्रभावः। (२) यत्प्रभावः।—(१) (विग्रहपद्धत्यै 'अप्रतिम' शब्दो द्रष्टव्यः)। (२) ये प्रभावाः (उपाधिकृता शक्तयः) यस्य सः (कीदृशाः प्रभावाः अस्य इति भावः)।

607. **प्रमाद**—(१) निन्द्रालस्यप्रमादोत्थम्; (२) प्रमादमोहौ। (३) प्रमादालस्यनिद्राभिः।—(१) [विग्रहपद्धत्यै 'आलस्य' (१) शब्दो द्रष्टव्यः]। (२) प्रमादश्च असौ मोहश्च प्रमादमोहौ। (३) [विग्रहपद्धत्यै 'आलस्य' (२) शब्दो द्रष्टव्यः]।

608. **प्रमुख**—भीष्मद्रोणप्रमुखतः—(विग्रहपद्धत्यै 'द्रोण' शब्दो द्रष्टव्यः)।

609. **प्रमेय**—(१) अप्रमेयस्य। (२) अप्रमेयम्।—(१-२) न प्रमेयम् (प्रमायाः विषयः भवितुमयोग्यम्) अप्रमेयम्; न प्रमेयः अप्रमेयः, तस्य अप्रमेयस्य।

610. **प्रयत**—प्रयतात्मनः।—[विग्रहपद्धत्यै 'आत्मन्' (२९) शब्दो द्रष्टव्यः]।

611. **प्रयाण**—प्रयाणकाले—[विग्रहपद्धत्यै 'काल' (२) शब्दो द्रष्टव्यः]।

612. **प्रलय**—प्रलयान्ताम्—[विग्रहपद्धत्यै 'अन्त' (१२) शब्दो द्रष्टव्यः]।

613. **प्रवाल**—विषयप्रवालाः—विषयाः प्रवालाः (बालपत्राणि) यासाम् ताः।

614. **प्रवीर**—कुरुप्रवीर—[विग्रहपद्धत्यै 'कुरु' (३) शब्दो द्रष्टव्यः]।

615. **प्रवृत्ति**—अप्रवृत्तिः—न प्रवृत्तिः (प्रवृत्त्याः अभावः)।

616. **प्रवृद्ध**—गुणप्रवृद्धाः—[विग्रहपद्धत्यै 'गुण' (४) शब्दो द्रष्टव्यः]।

617. **प्रव्यथित**—प्रव्यथितान्तरात्मा—(विग्रहपद्धत्यै 'अन्तरात्मन्' शब्दो द्रष्टव्यः)।

618. **प्रशान्त**—(१) प्रशान्तमनसम्। (२) प्रशान्तात्मा।—(१) प्रशान्तं मनः यस्य सः प्रशान्तमनाः, तम् प्रशान्तमनसम्। (२) [विग्रहपद्धत्यै 'आत्मन्' (३०) शब्दो द्रष्टव्यः]।

619. **प्रसक्त**—भोगैश्वर्यप्रसक्तानाम्—[विग्रहपद्धत्यै 'ऐश्वर्य' (२) शब्दो द्रष्टव्यः]।

620. **प्रसन्न**—(१) प्रसन्नचेतसः। (२) प्रसन्नात्मा।—(१-२) [विग्रहपद्धतिभ्यां 'चेतस्' (६), 'आत्मन्' (३१) शब्दौ क्रमेण द्रष्टव्यौ]।

621. **प्रसाद**—(१) तत्प्रसादात्। (२) त्वत्प्रसात्। (३) मत्प्रसादात्। (४) मनःप्रसादः। (५) व्यासप्रसादात्।—(१-२) [विग्रहपद्धतिभ्यां 'तद्' (४), 'त्वत्' (१) शब्दौ क्रमेण द्रष्टव्यौ]। (३) मम प्रसादः मत्प्रसादः, तस्मात् मत्प्रसादात्। (४) मनसः प्रसादः। (प्रसन्नत्वम्) मनःप्रसादः। (५) व्यासस्य (महाभारतकर्तुः) प्रसादः व्यासप्रसादः, तस्मात् व्यासप्रसादात्।

622. **प्रहरण**—नानाशस्त्रप्रहरणाः—(विग्रहपद्धत्यै 'नानाशस्त्र' शब्दो द्रष्टव्यः)।

623. **प्राज्ञ**—देवद्विजगुरुप्राज्ञपूजनम्—(विग्रहपद्धत्यै 'गुरु' शब्दो द्रष्टव्यः)

624. **प्राण**—(१) प्राणकर्माणि। (२) प्राणापानगती। (३) प्राणापानसमायुक्तः। (४) प्राणापानौ। (५) मद्गतप्राणाः। (६) मनः प्राणेन्द्रियक्रियाः।—(१-४) [विग्रहपद्धतिभ्यः 'कर्मन्' (३३), अपान (१, २, ३) शब्दाः क्रमेण द्रष्टव्याः]। (५) मद्गताः मयि (वासुदेवे परमात्मनि वा) गताः (आवेशिताः) प्राणाः येषां ते। (६) [विग्रहपद्धत्यै 'इन्द्रिय' (१३) शब्दो द्रष्टव्यः]।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



625. **प्राणायाम**—प्राणायामपरायणाः—[विग्रहपद्धत्यै 'परायण' (१) शब्दो दृष्टव्यः]।

626. **प्राप् (आप् + प्र)**—दुष्पापः—[विग्रहपद्धत्यै 'दुःख' (९) शब्दो दृष्टव्यः]।

627. **प्राप्त√आप् + प्र**—परम्पराप्राप्तम्—(विग्रहपद्धत्यै 'परम्परा' शब्दो दृष्टव्यः)।

628. **प्राप्य√आप् + प्र**—अप्राप्य—न प्राप्य।

629. **प्राप्ति**—देहान्तरप्राप्तिः—(विग्रहपद्धत्यै 'देहान्तर' शब्दो दृष्टव्यः)।

630. **प्रिय**—(१) अप्रियम्। (२) तामसप्रियम्। (३) तुल्यप्रियाप्रियः। (४) प्रियकृत्तमः। (५) प्रियचिकीर्षवः। (६) प्रियहितम्। (७) सात्त्विकप्रियाः।—(१) न प्रियम् अप्रियम्। (२–५) [विग्रहपद्धतिभ्यः 'तामस', 'अप्रिय', 'कृ' (१८), 'चिकीर्षु' शब्दाः क्रमेण दृष्टव्याः]। (६) प्रियं हितं (हितकरं) च तयोः समाहारः प्रियहितम्। (७) सात्त्विकानां (सत्त्वप्रधानप्रकृतीनां) प्रियाः सात्त्विकप्रियाः।

631. **प्रीत**—प्रीतमनाः—प्रीतं मनः यस्य सः।

632. **प्रीति**—प्रीतिपूर्वकम्—(विग्रहपद्धत्यै 'पूर्वक' शब्दो दृष्टव्यः)।

633. **प्रेप्सु**—कर्मफलप्रेप्सुः—[विग्रहपद्धत्यै 'कर्मफल' (३) शब्दो दृष्टव्यः]।

634. **प्लव**—ज्ञानप्लवेन—[विग्रहपद्धत्यै 'ज्ञान' (११) शब्दो दृष्टव्यः]।

## फ

635. **फल**—(१) कर्मफलम्। (२) कर्मफले। (३) त्यागफलम्। (४) पुण्यफलम्। (५) फलहेतवः। (६) फलाकाङ्क्षी। (७) शुभाशुभफलैः।—(१–४) [विग्रहपद्धतिभ्यः 'कर्मन्' (१०–११) 'त्याग' (२), 'पुण्य' (४) शब्दाः क्रमेण दृष्टव्याः]। (५) फले हेतुः येषां ते फलहेतवः। (६) (विग्रहपद्धत्यै 'आकाङ्क्षिन्' शब्दो दृष्टव्यः)। (७) शुभाशुभैः [शुभानि अशुभानि (न शुभानि) च शुभाशुभानि; तैः] फलैः शुभाशुभफलैः।

636. **फलप्रेप्सु**—अफलप्रेप्सुना—न फलप्रेप्सुः (फलं प्रेप्सते इति) अफलप्रेप्सुः, तेन।

637. **फलाकाङ्क्षिन्**—अफलाकाङ्क्षिभिः—न फलाकाङ्क्षिणः (फलानि आकाङ्क्षन्ति इति) अफलाकाङ्क्षिणः, तैः।

## ब

638. **बन्ध**—कर्मबन्धम्—[विग्रहपद्धत्यै 'कर्मन्' (१३) शब्दो दृष्टव्यः]।

639. **बन्धन**—(१) कर्मबन्धनः। (२) कर्मबन्धनैः।—(१–२) [विग्रहपद्धतिभ्यां 'कर्मन्' (१२, १४) शब्दौ क्रमेण दृष्टव्यौ]।

640. **बन्धु**— सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु— [विग्रहपद्धत्यै 'अरि' (३) शब्दो दृष्टव्यः]।

641. **बल**—योगबलेन—योगेन प्राप्तं बलम् योगबलम्, तेन।

642. **बहु**—(१) बहुधा। (२) बहुबाहूरुपादम्। (३) बहुमतः। (४) बहुवक्त्रनेत्रम्। (५) बहुविधाः। (६) बहुशाखाः। (७) बहूदरम्।—(१–२) [विग्रहपद्धतिभ्यः 'धा' (३), 'उरु' शब्दौ क्रमेण दृष्टव्यौ]। (३) बहुमतः [बहु मतः (मानदृष्ट्या अवलोकितः)]। (४) [विग्रहपद्धत्यै 'नेत्र' (२) शब्दो दृष्टव्यः]। (५) बहवः विधाः येषां ते



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बहुविधाः। ( ६ ) बहवः शाखाः यासां ताः बहुशाखाः। ( ७ ) [विग्रहपद्धत्यै 'उदर' (१) शब्दो द्रष्टव्यः]।

643. **बहुदंष्ट्रा**—बहुदंष्ट्राकरालम्—[विग्रहपद्धत्यै 'कराल' (२) शब्दः द्रष्टव्यः]।

644. **बहुल**—(१) क्रियाविशेषबहुलाम्। (२) बहुलायासम्।—( १-२ ) [विग्रहपद्धतिभ्यां 'क्रियाविशेष', 'आयास' शब्दौ क्रमेण द्रष्टव्यौ]।

645. **बान्धव**—स्वबान्धवान्—स्वस्य (आत्मनः) बान्धवाः स्वबान्धवाः, तान्।

646. **बाहु**—(१) अनन्तबाहुम्। (२) बहुबाहूरुपादम्। (३) महाबाहुः। (४) महाबाहो। (५) सहस्रबाहो।—( १-२ ) [विग्रहपद्धतिभ्यां 'अनन्त' (१), 'उरु' शब्दौ क्रमेण द्रष्टव्यौ]। ( ३-४ ) महान्तौ बाहू यस्य सः महाबाहुः; महाबाहो इति संबोधने। ( ५ ) सहस्राः (असंख्येयाः) बाहवः यस्य सः सहस्रबाहुः; सहस्रबाहो इति संबोधने।

647. **बाहूदरवक्त्रनेत्र**—अनेकबाहूदरवक्त्रनेत्रम्—[विग्रहपद्धत्यै 'अनेक' (२) शब्दो द्रष्टव्यः]।

648. **बाह्य**—बाह्यस्पर्शेषु—बाह्याश्च ते स्पर्शाश्च (शब्दादयो विषयाः) बाह्यस्पर्शाः, तेष

649. **बीज**—बीजप्रदः—[विग्रहपद्धत्यै 'प्रद' (३) शब्दो द्रष्टव्यः]।

650. **बुद्धि**—(१) अबुद्धयः। (२) अल्पबुद्धयः। (३) असक्तबुद्धिः। (४) तद्बुद्धयः। (५) दुर्बुद्धेः। (६) बुद्धिग्राह्यम्। (७) बुद्धिनाशः। (८) बुद्धिनाशात्। (९) बुद्धिभेदम्। (१०) बुद्धियुक्तः। (११) बुद्धियुक्ताः। (१२) बुद्धियोगम्। (१३) बुद्धियोगात्। (१४) बुद्धिसंयोगम्। (१५) मय्यर्पितमनोबुद्धिः। (१६) यतेन्द्रियमनोबुद्धिः। (१७) समबुद्धयः। (१८) समबुद्धिः। (१९) स्थिरबुद्धिः।—( १ ) बुद्धिः येषु न विद्यते ते अबुद्धयः। ( २-८ ) [विग्रहपद्धतिभ्यः 'अल्प' (१), 'असक्त' (१), 'तद्' (१०), 'दुष्ट' (२), 'ग्राह्य', 'नाश' (२-३) शब्दाः क्रमेण द्रष्टव्याः]। ( ९ ) बुद्धेः (निश्चयस्य, भावनायाः वा) भेदः बुद्धिभेदः, तम् बुद्धिभेदम्। ( १०-११ ) बुद्ध्या (ज्ञानेन) युक्तः बुद्धियुक्तः; तस्य अनेकाः बुद्धियुक्ताः। ( १२-१३ ) बुद्धेः (ज्ञानस्य) योगः बुद्धियोगः; तस्मात् बुद्धियोगात्। ( १४ ) बुद्धेः (विवेकबुद्धेः) संयोग: (पुनराप्तिः) बुद्धिसंयोगः, तम् बुद्धिसंयोगम्। ( १५ ) विग्रहपद्धत्यै 'अर्पित' शब्दो द्रष्टव्यः)। ( १६ ) [विग्रहपद्धत्यै 'इन्द्रिय' (१४) शब्दो द्रष्टव्यः]। ( १७-१८ ) समा (समाना) बुद्धिः येषां ते समबुद्धयः; समबुद्धिः इति प्रथमायाः एकवचनम्। ( १९ ) स्थिरा बुद्धिः यस्य सः स्थिरबुद्धिः।

651. **बृहत्**—बृहत्साम—'बृहत्' इति संज्ञितः (मोक्षप्रतिपादकः) सामविशेषः।

652. **ब्रह्मकर्मन्**—ब्रह्मकर्मसमाधिना—ब्रह्मकर्मणि (ब्रह्मैव कर्म, तस्मिन्) समाधिः (सम्यक् आधानं) यस्य सः ब्रह्मकर्मसमाधिः, तेन।

653. **ब्रह्मचारिन्**—ब्रह्मचारिव्रते—ब्रह्मचारिणः [ब्रह्मणः चर्या (गुरुगृहे वासः, भिक्षाटनं, वेदाभ्यासः, भूमिशयनं, स्त्रीसंगवर्जनं इत्यादिकात्मिका) यः आचरति सः ब्रह्मचारिन्, तस्य] व्रतम् ब्रह्मचारिव्रतम्, तस्मिन्।

654. **ब्रह्मन्**—(१) ब्रह्मकर्म। (२) ब्रह्मचर्यम्। (३) ब्रह्मनिर्वाणम्। (४) ब्रह्मभूतम्। (५) ब्रह्मभूतः। (६) ब्रह्मभूयाय। (७) ब्रह्मवादिनाम्। (८) ब्रह्मवित्। (९) ब्रह्मविदः।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(१०) ब्रह्मसंस्पर्शम्; (११) ब्रह्माग्नौ। (१२) ब्रह्मोद्भवम्। (१३) महद्ब्रह्म। (१४) शब्दब्रह्म।—(१–३) [विग्रहपद्धतिभ्यः 'कर्मन्' (३४) 'चर्या', 'निर्वाण' (२) शब्दाः क्रमेण द्रष्टव्याः]। (४–५) ब्रह्मभूतः (ब्रह्मणः स्थितिं प्राप्तः) ब्रह्मभूतः; तम् ब्रह्मभूतम्। (६) ब्रह्मणः भूयः (भवनं) ब्रह्मभूयः, तस्मै ब्रह्मभूयाय। (७) ब्रह्मणः (वेदस्य) वदनं (पाठः) तत् शीलं येषां ते ब्रह्मवादिनः (श्रोत्रियाः), तेषां ब्रह्मवादिनाम्। (८–९) ब्रह्म यः वेत्ति सः ब्रह्मवित्; ब्रह्मविदः इति प्रथमा-बहुवचनम्। (१०) ब्रह्मणा संस्पर्शः यस्य तत् ब्रह्मसंस्पर्शम्, तम् ब्रह्मसंस्पर्शम्। (११–१२) [विग्रहपद्धतिभ्यां 'अग्नि' (५), 'उद्भव' (३) शब्दौ क्रमेण द्रष्टव्यौ]। (१३) महत् (देशतः कालतश्च अविच्छिन्नत्वात्, सर्वकार्ये महत्त्वाद्वा, महत्) च ब्रह्म (बृंहणात्, सर्वेषां वस्तूनां वृद्धिहेतुत्वात्, स्वविकाराणां भरणाद्वा, ब्रह्म) च महद्ब्रह्म। (१४) शब्दात्मकं, शब्दरूपं वा, ब्रह्म शब्दब्रह्म (वेदः)।

655. **ब्रह्मभवन**—आब्रह्मभवनात्—[विग्रहपद्धत्यै 'आ(रभ्य)' (१) शब्दो द्रष्टव्यः]।

656. **ब्रह्मभुवन**—आब्रह्मभुवनात्—[विग्रहपद्धत्यै 'आ(रभ्य)' (२) शब्दो द्रष्टव्यः)।

657. **ब्रह्मयोगयुक्त**—ब्रह्मयोगयुक्तात्मा—[विग्रहपद्धत्यै 'आत्मन्' (३२) शब्दो द्रष्टव्यः]।

658. **ब्रह्मसूत्र**—ब्रह्मसूत्रपदैः—(विग्रहपद्धत्यै 'पद' शब्दो द्रष्टव्यः)।

659. **ब्राह्मण**—ब्राह्मणक्षत्रियविशाम्—(विग्रहपद्धत्यै 'क्षत्रिय' शब्दो द्रष्टव्यः)।

## भ

660. **भक्त**—(१) अन्यदेवताभक्ताः। (२) अभक्ताय। (३) मद्भक्तः। (४) मद्भक्ताः। (५) मद्भक्तेषु।—(१) (विग्रहपद्धत्यै 'अन्यदेवता' शब्दो द्रष्टव्यः)। (२) न भक्तः, अभक्तः, तस्मै अभक्ताय। (३–५) मम भक्तः मद्भक्तः; मद्भक्ताः इति प्रथमायाः बहुवचनम्; तेषु मद्भक्तेषु।

661. **भक्ति**—(१) एकभक्तिः। (२) भक्तियोगेन। (३) भक्त्युपहृतम्। (४) मद्भक्तिम्।—(१) [विग्रहपद्धत्यै 'एक' (१) शब्दो द्रष्टव्यः]। (२) भक्तिः एव योगः, भक्त्यात्मको योगः, भक्त्या योगः वा, भक्तियोगः, तेन भक्तियोगेन। (३) (विग्रहपद्धत्यै 'उपहृत' शब्दो द्रष्टव्यः)। (४) मम भक्तिः मद्भक्तिः, ताम् मद्भक्तिम्।

662. **भगवत्**—श्रीभगवान्—श्रीयुक्तः, श्रीमान् वा, भगवान्।

663. **भय**—(१) अभयम्। (२) कायक्लेशभयात्। (३) भयाभये। (४) भयावहः। (५) हर्षामर्षभयोद्वेगैः।—(१) न भयम् अभयम् (भयस्य अभावः)। (२–५) [विग्रहपद्धतिभ्यः 'कायक्लेश', 'अभय', 'आवह', 'अमर्ष' शब्दाः क्रमेण द्रष्टव्याः]।

664. **भरत**—(१) भरतर्षभ। (२) भरतश्रेष्ठ। (३) भरतसत्तम।—(१) [विग्रहपद्धत्यै 'ऋषभ' (२) शब्दो द्रष्टव्यः]। (२) भरतेषु भरतवंशीयेषु श्रेष्ठः भरतश्रेष्ठः; संबोधने विसर्गलोपः। (३) भरतेषु (भरतवंशीयेषु) ये सन्तः तेषु उत्तमः भरतसत्तमः; संबोधने विसर्गलोपः।

665. **भर्तृ**—भूतभर्तृ—भूतानां भर्तृ (पालयितृ)।

666. **भव**—भवाप्ययौ—(विग्रहपद्धत्यै 'अप्यय' शब्दो द्रष्टव्यः)।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



667. **भवितृ**—अभविता—न भविता।

668. **भाग**—यथाभागम्—यथा यथा भागेषु नियुक्ताः तथा तथा (अवस्थिताः)।

669. **भाव**—(१) अभावः। (२) ईश्वरभावः। (३) नानाभावान्। (४) भावसमन्विताः। (५) भावसंशुद्धिः। (६) मद्भावम्। (७) मद्भावाय। (८) मद्भावाः। (९) विमूढभावः। (१०) सद्भावे। (११) सर्वभावेन। (१२) साधुभावे। (१३) स्वभावः।—(१) न भावः अभावः (नास्तित्वम्)। (२–३) [विग्रहपद्धतिभ्यां 'ईश्वर' (२), 'नाना' (१) शब्दौ क्रमेण द्रष्टव्यौ]। (४) भावेन समन्विताः भावसमन्विताः। (५) भावानां संशुद्धिः भावसंशुद्धिः। (६–८) मम भावः मद्भावः, तम् मद्भावम्; तस्मै मद्भावाय; मम भावाः मद्भावाः। (९) विमूढत्वस्य भावः विमूढभावः। (१०) सतः (सद्वस्तुनः) भावः सद्भावः, तस्मिन् सद्भावे। (११) (तत्) सर्वः इति भावः सर्वभावः, तेन सर्वभावेन। (१२) साधुत्वस्य भावः साधुभावः, तस्मिन् साधुभावे। (१३) स्वस्य (आत्मनः) भावः स्वभावः।

670. **भावन**—(१) भूतभावन। (२) भूतभावनः।—(१–२) भूतानां भावनः (उत्पत्तिस्थानं, कारणं वा) भूतभावनः; संबोधने विसर्गलोपः।

671. **भावयत्**—अभावयतः—न भावयन् अभावयन्, तस्य अभावयतः।

672. **भावित√भाव्**—(१) तद्भावभावितः। (२) यज्ञभाविताः।—(१) (विग्रहपद्धत्यै 'तद्भाव' शब्दो द्रष्टव्यः)। (२) यज्ञेन भाविताः (स्मर्यमाणतया अभ्यस्ताः) यज्ञभाविताः।

673. **भी**—(१) विगतभीः। (२) व्यपेतभीः।—(१) विगता भीः यस्मात् (यस्य हृदयात्) सः विगतभीः; (२) व्यपेता (निर्गता) भीः यस्मात् (यस्य हृदयात्) सः व्यपेतभीः।

674. **भीत**—भीतभीतः—यः पूर्वं भीतः स पुनः भीतः (भयाविष्टचेताः बभूव)।

675. **भीम**—(१) भीमकर्मा। (२) भीमाभिरक्षितम्। (३) भीमार्जुनसमाः।—(१–३) [विग्रहपद्धतिभ्यः 'कर्मन्' (३५), 'अभिरक्षित' (१), 'अर्जुन' (२) शब्दाः क्रमेण द्रष्टव्याः]।

676. **भीष्म**—(१) भीष्मद्रोणप्रमुखतः। (२) भीष्माभिरक्षितम्।—(१–२) [विग्रहपद्धतिभ्यां 'द्रोण', 'अभिरक्षित' (२) शब्दौ क्रमेण द्रष्टव्यौ]।

677. **भुज**—चतुर्भुजेन—[विग्रहपद्धत्यै 'चतुस्' (१) शब्दो द्रष्टव्यः]।

678. **भुज्**—यज्ञशिष्टामृतभुजः।—यज्ञशिष्टामृतं (यज्ञे शिष्टं अमृतं) ये भुञ्जन्ति ते यज्ञशिष्टामृतभुजः।

679. **भूत**—(१) अधिभूतम्। (२) जीवभूतः। (३) जीवभूताम्। (४) ब्रह्मभूतम्। (५) ब्रह्मभूतः। (६) भूतगणान्। (७) भूतग्रामम्। (८) भूतग्रामः। (९) भूतपृथग्भावम्। (१०) भूतभर्तृ। (११) भूतभावन। (१२) भूतभावनः। (१३) भूतभृत्। (१४) भूतमहेश्वरम्। (१५) भूतसर्गौ। (१६) भूतस्थः। (१७) भूतादिम्। (१८) भूतेज्याः। (१९) भूतेश। (२०) महाभूतानि। (२१) सर्वभूतानाम्। (२२) सर्वभूतानि।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(२३) सर्वभूतेषु।—(१–१२) [विग्रहपद्धतिभ्यः 'अधि' (३), 'जीव' (१–२), 'ब्रह्मन्' (४–५), 'गण' (१), 'ग्राम' (२–३), 'पृथग्भाव', 'भर्तृ', 'भावन' (१–२), शब्दाः क्रमेण द्रष्टव्याः]। (१३) भूतानि बिभर्तीति भूतभृत्। (१४) भूतानां महेश्वरः (महान् ईश्वरः) भूतमहेश्वरः, तम् भूतमहेश्वरम्। (१५) भूतानां सर्गो भूतसर्गो। (१६) भूतेषु स्थितः भूतस्थः। (१७–१९) [विग्रहपद्धतिभ्यः 'आदि' (१२), 'इज्या', 'ईश' (५) शब्दाः क्रमेण द्रष्टव्याः]। (२०) महन्ति भूतानि महाभूतानि। (२१–२३) सर्वाणि भूतानि सर्वभूतानि; तेषां सर्वभूतानाम्; तेषु सर्वभूतेषु।

680. **भूतप्रकृति**—भूतप्रकृतिमोक्षम्—भूतप्रकृतेः (भूतानां प्रकृतिः भूतप्रकृतिः, तस्मात्) मोक्षः भूतप्रकृतिमोक्षः, तम्।

681. **भूतभाव**—भूतभावोद्भवकरः—(विग्रहपद्धत्यै 'उद्भवकर' शब्दो द्रष्टव्यः)।

682. **भूतविशेष**—भूतविशेषसङ्घान्—भूतविशेषाणां (विशिष्टानि भूतानि भूतविशेषाणि, तेषां) सङ्घाः भूतविशेषसङ्घाः, तान्।

683. **भूय**—ब्रह्मभूयाय—[विग्रहपद्धत्यै 'ब्रह्मन्' (६) शब्दो द्रष्टव्यः]।

684. **भृत्**—(१) देहभृत्। (२) देहभृता। (३) देहभृताम्। (४) भूतभृत्; (५) शस्त्रभृताम्। (६) सर्वभृत्।—(१–४) [विग्रहपद्धतिभ्यः 'देह' (२-४) 'भूत' (१३) शब्दाः क्रमेण द्रष्टव्याः]। (५) शस्त्राणि बिभ्रन्तीति शस्त्रभृतः, तेषाम् शस्त्रभृताम्। (६) सर्वं बिभर्तीति सर्वभृत्।

685. **भेद**—(१) गुणभेदतः। (२) बुद्धिभेदम्।—(१–२) [विग्रहपद्धतिभ्यां 'गुण' (५), 'बुद्धि' (९) शब्दौ क्रमेण द्रष्टव्यौ]।

686. **भोक्तृ**—गुणभोक्तृ—[विग्रहपद्धत्यै 'गुण' (६) शब्दो द्रष्टव्यः]।

687. **भोग**—(१) कामभोगेषु। (२) देवभोगान्। (३) भोगैश्वर्यगतिम्। (४) भोगैश्वर्यप्रसक्तानाम्।—(१–२) [विग्रहपद्धतिभ्यां 'काम' (११), 'देव' (७) शब्दौ क्रमेण द्रष्टव्यौ]। (३–४) [विग्रहपद्धतिभ्यां 'ऐश्वर्य' (१–२) शब्दौ क्रमेण द्रष्टव्यौ]।

688. **भोजन**—विहारशय्यासनभोजनेषु—(विग्रहपद्धत्यै 'आसन' शब्दो द्रष्टव्यः)।

689. **भ्रंश**—स्मृतिभ्रंशात्—स्मृतेः भ्रंशः स्मृतिभ्रंशः, तस्मात्।

690. **भ्रष्ट**—योगभ्रष्टः—योगात् (योगमार्गात्) भ्रष्टः।

## म

691. **मणि**—मणिगणाः—मणीनां गणाः।

692. **मणिपुष्पक**—सुघोषमणिपुष्पकौ—सुघोषश्च असौ मणिपुष्पकश्च।

693. **मत**—बहुमतः—[विग्रहपद्धत्यै 'बहु' (३) शब्दो द्रष्टव्यः]।

694. **मति**—(१) दुर्मतिः। (२) स्थिरमतिः।—(१) [विग्रहपद्धत्यै 'दुष्ट' (३) शब्दो द्रष्टव्यः]। (२) स्थिरा (दृढा, सङ्कल्पविकल्परहिता) मतिः यस्य सः स्थिरमतिः।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



695. **मद् ( अहम्, मम, मयि, एतेषां वैकल्पिकं रूपम् )**—(१) मच्चित्तः । (२) मच्चित्ताः । (३) मत्परमः । (४) मत्परमाः । (५) मत्परम् । (६) मत्परः । (७) मत्परायणः । (८) मत्पराः । (९) मत्प्रसादात् । (१०) मत्संस्थाम् । (११) मत्स्थानि । (१२) मदनुग्रहाय । (१३) मदर्थम् । (१४) मदर्थे । (१५) मदर्पणम् । (१६) मदाश्रयः । (१७) मद्गतेन । (१८) मद्भक्तः । (१९) मद्भक्ताः । (२०) मद्भक्तिम् । (२१) मद्भक्तेषु । (२२) मद्भावम् । (२३) मद्भावाय । (२४) मद्भावाः । (२५) मद्याजिनः । (२६) मद्याजी । (२७) मद्योगम् । (२८) मद्व्यपाश्रयः । (२९) मन्मनाः ।—( १-९ ) [विग्रहपद्धतिभ्यः 'चित्त' (१-२), 'परम' (८-९), 'पर' (१५-१६), 'परायण' (४), 'पर' (१७) 'प्रसाद' (३) शब्दाः क्रमेण दृष्टव्याः] ( १० ) मयि संस्थिता मत्संस्था, ताम् मत्संस्थाम् । ( ११ ) मयि स्थितानि मत्स्थानि । ( १२-२४ ) [विग्रहपद्धतिभ्यः 'अनुग्रह', 'अर्थ' (१७-१८), 'अर्पण', 'आश्रय' (२), 'गत' (९), 'भक्त' (३-४), 'भक्ति' (४), 'भक्त' (५), 'भाव' (६-८), शब्दाः क्रमेण दृष्टव्याः] । ( २५-२६ ) मह्यम् (मत्कृते) यजतीति मयाजी; मह्यम् यजन्तीति मद्याजिनः । ( २७ ) मम योगः मद्योगः, तम् मद्योगम् । ( २८ ) मम व्यपाश्रये (स्थितः) मद्व्यपाश्रयः । ( २९ ) मयि मनः यस्य सः मन्मनाः ।

696. **मत्कर्मन्**—(१) मत्कर्मकृत्; (२) मत्कर्मपरमः ।—[विग्रहपद्धतिभ्यां 'कृ' (१९) 'परम' (७) शब्दौ क्रमेण दृष्टव्यौ] ।

697. **मत्सर**—विमत्सरः—विगतः मत्सरः यस्मात् सः ।

698. **मद**—(१) दम्भमानमदान्विताः; (२) धनमानमदान्विताः—[विग्रहपद्धतिभ्यां 'अन्वित' (३-४) शब्दौ दृष्टव्यौ] ।

699. **मद्गत**—मद्गतप्राणाः—[विग्रहपद्धत्यै 'प्राण' (५) शब्दो दृष्टव्यः] ।

700. **मधु**—(१) मधुसूदन । (२) मधुसूदनः—( १-२ ) मधुदैत्यस्य सूदनः (संहर्ता) मधुसूदनः; संबोधने विसर्गलोपः ।

701. **मध्य**—व्यक्तमध्यानि—मध्ये एव व्यक्तानि ये ते ।

702. **मध्यस्थ**—सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु—[विग्रहपद्धत्यै 'अरि' (३) शब्दो दृष्टव्यः] ।

703. **मनस्**—(१) अनुद्विग्नमनाः । (२) प्रशान्तमनसम् । (३) प्रीतमनाः । (४) मनःप्रसादः । (५) मनःप्राणेन्द्रियक्रियाः । (६) मनःषष्ठानि । (७) मनोगतान् । (८) मन्मनाः । (९) मय्यर्पितमनोबुद्धिः । (१०) मय्यासक्तमनाः । (११) यतेन्द्रियमनोबुद्धिः । (१२) शरीरवाङ्मनोभिः ।—( १ ) [विग्रहपद्धत्यै 'अनुद्विग्न' शब्दो दृष्टव्यः] । ( २ ) प्रशान्तं मनः यस्य सः प्रशान्तमनाः, तम् प्रशान्तमनसम् । ( ३-५ ) [विग्रहपद्धतिभ्यः 'प्रीत', 'प्रसाद' (४), 'इन्द्रिय' (१३) शब्दाः क्रमेण दृष्टव्याः] ( ६ ) मनः षष्ठं येषां मध्ये तानि मनःषष्ठानि; द्वितीयाः बहुवचनम् । ( ७-११ ) [विग्रहपद्धतिभ्यः 'गत' (१०), 'मत्' (२९), 'अर्पित', 'आसक्त' (२), 'इन्द्रिय' (१४) शब्दाः क्रमेण दृष्टव्याः] । ( १२ ) शरीरं वाक् मनश्च शरीरवाङ्मनांसि, तैः शरीरवाङ्मनोभिः ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



704. **मनुष्य**—मनुष्यलोके—मनुष्याणां लोकः (यस्मिन् मनुष्याः वसन्ति सः लोकः) मनुष्यलोकः, तस्मिन्।

705. **मन्त्र**—मन्त्रहीनम्—मन्त्रेभ्यो हीनः (रहितः) मन्त्रहीनः, तम्।

706. **ममत्व**—निर्ममः—ममत्वं निर्गतं यस्मात् (यस्य हृदयात्) सः।

707. **मयि (अस्मद्)**—(१) मय्यर्पितमनोबुद्धिः। (२) मय्यावेशितचेतसाम्। (३) मय्यासक्तमनाः।—(१) (विग्रहपद्धत्यै 'अर्पित' शब्दो द्रष्टव्यः)। (२) (विग्रहपद्धत्यै 'आवेशित' शब्दो द्रष्टव्यः)। (३) [विग्रहपद्धत्यै 'आसक्त' (२) शब्दो द्रष्टव्यः]।

708. **मर्त्य**—मर्त्यलोकम्—मर्त्यानां लोकः मर्त्यलोकः, तम्।

709. **मल**—(१) अमलान्। (२) निर्मलत्वात्। (३) निर्मलम्।—(१) न मलः विद्यते येषु ते अमलाः, तान् अमलान्। (२-३) [विग्रहपद्धतिभ्यां 'निर्गत' (११-१२) शब्दौ द्रष्टव्यौ]।

710. **महत्**—(१) महद्ब्रह्म। (२) महद्योनिः। (३) महर्षयः। (४) महर्षीणाम्। (५) महात्मनः। (६) महात्मन्। (७) महात्मा। (८) महात्मानः। (९) महानुभावान्। (१०) महापाप्मा। (११) महाबाहुः। (१२) महाबाहो। (१३) महाभूतानि। (१४) महायोगेश्वरः। (१५) महारथः। (१६) महारथाः। (१७) महाशङ्खम्। (१८) महाशनः। (१९) महेश्वरः। (२०) महेष्वासाः।—(१) [विग्रहपद्धत्यै 'ब्रह्मन्' (१३) शब्दो द्रष्टव्यः]। (२) महती योनिः महद्योनिः। (३-१३) [विग्रहपद्धतिभ्यः 'ऋषि' (३-४), 'आत्मन्' (३३-३६) 'अनुभाव', 'पाप्मन्', 'बाहु' (३-४), 'भूत' (२०) शब्दाः क्रमेण द्रष्टव्याः]। (१४) महान् योगेश्वरः (योगस्य, योगानां वा, ईश्वरः) महायोगेश्वरः। (१५-१६) महान् रथः, यस्य सः महारथः, येषां ते महारथाः; (महारथः, अतिरथः इत्यादयो योधानां कक्षाः)। (१७) महान् शङ्खः महाशङ्खः, तम् महाशङ्खम्। (१८-२०) [विग्रहपद्धतिभ्यः 'अशन', 'ईश्वर' (५) 'इष्वास' (२) शब्दाः क्रमेण द्रष्टव्याः]।

711. **महर्षि**—महर्षिसिद्धसङ्घाः—महर्षीणां (महान्तः ऋषयः महर्षयः, तेषां) सिद्धानां च सङ्घाः।

712. **मही**—(१) महीकृते। (२) महीक्षिताम्। (३) महीपते।—(१-३) [विग्रहपद्धतिभ्यः 'कृते', 'क्षित्', 'पति' (४) शब्दाः क्रमेण द्रष्टव्याः]।

713. **महेश्वर**—(१) भूतमहेश्वरम्। (२) लोकमहेश्वरम्। (३) सर्वलोकमहेश्वरम्।—(१) [विग्रहपद्धत्यै 'भूत' (१४) शब्दो द्रष्टव्यः]। (२) लोकानां महेश्वरम् (महान् ईश्वरः महेश्वरः, तम्) लोकमहेश्वरम्। (३) सर्वलोकानां (सर्वेषां लोकानां) महेश्वरम् (महान् ईश्वरः महेश्वरः, तम्) सर्वलोकमहेश्वरम्।

714. **मा** (Noun)—(१) माधव। (२) माधवः।—(१-२) मा (लक्ष्मीः), तस्याः धवः पतिः (विष्णुः); संबोधने विसर्गलोपः।

715. **मात्र**—निमित्तमात्रम्—[विग्रहपद्धत्यै 'निमित्त' शब्दो द्रष्टव्यः]।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



716. **मात्रा**—मात्रास्पर्शाः—मात्राणां (इन्द्रियाणां) स्पर्शाः (शब्दादिभिः संयोगाः), मात्राश्च स्पर्शाश्च (शब्दादयो विषयाश्च) वा।

717. **मान**—(१) दम्भमानमदान्विताः। (२) धनमानमदान्विताः। (३) मानापमानयोः। (४) मानावमानयोः।—(१-४) [विग्रहपद्धतिभ्यः 'अन्वित' (३-४) 'अपमान', 'अवमान' शब्दाः क्रमेण द्रष्टव्याः]।

718. **मानमोह**—निर्मानमोहाः—[विग्रहपद्धत्यै 'निर्गत' (१३) शब्दो द्रष्टव्यः]।

719. **मानस**—(१) चलितमानसः। (२) नियतमानसः। (३) शोकसंविग्नमानसः।—(१-२) [विग्रहपद्धतिभ्यां 'चलित' 'नियत' (१) शब्दौ क्रमेण द्रष्टव्यौ]। (३) शोकसंविग्नं (शोकेन संविग्नं) मानसं यस्य सः शोकसंविग्नमानसः।

720. **मानित्व**—अमानित्वम्—न मानित्वम् (मानित्वस्य अभावः)।

721. **माम्**—मामुपाश्रिताः—[विग्रहपद्धत्यै 'उपाश्रित' शब्दो द्रष्टव्यः]।

722. **माया**—आत्ममायया—[विग्रहपद्धत्यै 'आत्मन्' (९) शब्दो द्रष्टव्यः]।

723. **मास**—षण्मासाः—षट् मासाः।

724. **मित्र**—(१) मित्रद्रोहे। (२) मित्रारिपक्षयोः। (३) सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु।—[विग्रहपद्धतिभ्यः 'द्रोह' (२), 'अरि' (२-३) शब्दाः क्रमेण द्रष्टव्याः]।

725. **मिथ्या**—मिथ्याचारः—[विग्रहपद्धत्यै 'आचार' (२) शब्दो द्रष्टव्यः]।

726. **मुक्त**—मुक्तसङ्गः—मुक्तः सङ्गात् (कर्मफलसङ्गात्) यः सः।

727. **मुख**—(१) विश्वतोमुखम्। (२) विश्वतोमुखः।—(१-२) विश्वतः (सर्वासु दिक्षु) मुखानि यस्य सः विश्वतोमुखः; तम् विश्वतोमुखम्।

728. **मुख्य**—योधमुख्यैः—योधानां मुख्याः योधमुख्याः, तैः।

729. **मूढ**—(१) अमूढाः। (२) मूढग्राहेण। (३) मूढयोनिषु।—(१) न मूढाः (विचक्षणाः पुरुषाः)। (२) (विग्रहपद्धत्यै 'ग्राह' शब्दो द्रष्टव्यः)। (३) मूढाः (बुद्धिवागिन्द्रियादिभिः रहिताः) योनयः मूढयोनयः, तासु।

730. **मूर्ति**—(१) अव्यक्तमूर्तिना। (२) विश्वमूर्ते।—(१) [विग्रहपद्धत्यै 'अव्यक्त' (२) शब्दो द्रष्टव्यः]। (२) विश्वमेव मूर्तिः यस्य सः विश्वमूर्तिः; विश्वमूर्ते इति संबोधने।

731. **मूल**—ऊर्ध्वमूलम्—(विग्रहपद्धत्यै 'ऊर्ध्व' शब्दो द्रष्टव्यः)।

732. **मृग**—मृगेन्द्रः—[विग्रहपद्धत्यै 'इन्द्र' (२) शब्दो द्रष्टव्यः]।

733. **मृत**—(१) अमृतस्य। (२) अमृतम्।—(१-२) न मृतम् अमृतम् (मोक्षः); तस्य अमृतस्य।

734. **मृतत्व**—अमृतत्वाय—मृतस्य भावः मृतत्वम्; न मृतत्वम् अमृतत्वम् (मोक्षः), तस्मै।

735. **मृत्युसंसार**—(१) मृत्युसंसारवर्त्मनि। (२) मृत्युसंसारसागरात्।—(१) मृत्युसंसारः (मृत्युयुक्तः संसारः) तस्य वर्त्म मृत्युसंसारवर्त्म, तस्मिन् मृत्युसंसारवर्त्मनि। (२) मृत्युसंसारः (मृत्युयुक्तः संसारः) स एव सागरः (दुस्तरत्वात्), मृत्युसंसारसागरः, तस्मात् मृत्युसंसारसागरात्।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



736. **मेधा**—(१) अल्पमेधसाम् । (२) दुर्मेधाः ।—( १–२ ) [विग्रहपद्धतिभ्यां 'अल्प', (२), 'दुष्ट' (४) शब्दौ क्रमेण द्रष्टव्यौ] ।

737. **मेध्य**—अमेध्यम्—न मेध्यम् । (यजनविधौ अनुपयुक्तम् ) ।

738. **मोक्ष**—(१) जरामरणमोक्षाय । (२) भूतप्रकृतिमोक्षम् । (३) मोक्षकाङ्क्षिभिः । (४) मोक्षपरायणः ।—( १–४ ) [विग्रहपद्धतिभ्यः 'जरामरण', 'भूतप्रकृति', 'काङ्क्षिन्' (२), 'परायण' (५) शब्दाः क्रमेण द्रष्टव्याः] ।

739. **मोघ**—(१) मोघकर्माणः । (२) मोघज्ञानाः । (३) मोघाशाः ।—( १–३ ) [विग्रह-पद्धतिभ्यः 'कर्मन्' (३६), 'ज्ञान' (२०), 'आशा' (२) शब्दाः क्रमेण द्रष्टव्याः] ।

740. **मोह**—(१) द्वन्द्वमोहेन । (२) प्रमादमोहौ । (३) मोहकलिलम् ।—( १–३ ) [विग्रह-पद्धतिभ्यः 'द्वन्द्व' (१), 'प्रमाद' (२), 'कलिल' शब्दाः क्रमेण द्रष्टव्याः]

741. **मोहजाल**—मोहजालसमावृताः—मोहजालेन (मोहेन प्रसृतं जालम् मोहजालम् , तेन) समावृताः (समन्तात् आवृताः) ।

## य

742. **यक्ष**—(१) गन्धर्वयक्षासुरसिद्धसङ्घाः । (२) यक्षरक्षसाम् । (३) यक्षरक्षांसि ।—( १ ) [विग्रहपद्धत्यै 'असुर' शब्दो द्रष्टव्यः] । ( २–३ ) यक्षाः रक्षांसि च यक्षरक्षांसि; तेषां यक्षरक्षसाम् ।

743. **यज्**—देवयजः—[विग्रहपद्धत्यै 'देव' (८) शब्दो द्रष्टव्यः] ।

744. **यज्ञ**—(१) अधियज्ञः । (२) अयज्ञस्य । (३) जपयज्ञः । (४) ज्ञानयज्ञः । (५) ज्ञान-यज्ञेन । (६) तपोयज्ञाः । (७) द्रव्ययज्ञाः । (८) नामयज्ञैः । (९) यज्ञक्षपितकल्मषाः । (१०) यज्ञतपसाम् । (११) यज्ञतपःक्रियाः । (१२) यज्ञदानतपःकर्म । (१३) यज्ञ-दानतपःक्रियाः । (१४) यज्ञभाविताः । (१५) यज्ञविदः । (१६) यज्ञार्थात् । (१७) योगयज्ञाः । (१८) सर्वयज्ञानाम् । (१९) सहयज्ञाः । (२०) सहयज्ञैः । (२१) स्वाध्यायज्ञानयज्ञाः ।—( १ ) [विग्रहपद्धत्यै 'अधि' (४) शब्दो द्रष्टव्यः] । ( २ ) यज्ञान् न करोति इति अयज्ञः; तस्य अयज्ञस्य । ( ३–१४ ) [विग्रहपद्धतिभ्यः 'जप', 'ज्ञान' (१२–१३), 'तपस्' (२), 'द्रव्य' 'नाम', 'क्षपितकल्मष', 'तपस्' (३), क्रिया (४), 'कर्मन्' (३७), क्रिया (५), 'भावित' (२), शब्दाः क्रमेण द्रष्टव्याः] । ( १५ ) यज्ञान् (यज्ञरहस्यम् ) ये विदन्ति ते यज्ञविदः । ( १६ ) [विग्रह-पद्धत्यै 'अर्थ' (१९) शब्दो द्रष्टव्यः] । ( १७ ) योगः एव यज्ञः, योगात्मकः यज्ञः वा, येषां ते योगयज्ञाः; ( १८ ) सर्वे यज्ञाः सर्वयज्ञाः, तेषां सर्वयज्ञानाम् । ( १९–२० ) यज्ञैः सहिताः सहयज्ञाः, तैः सहयज्ञैः । ( २१ ) स्वाध्यायज्ञानं (स्वाध्यायस्य, वेदस्य, ज्ञानं) एव यज्ञः येषां ते स्वाध्यायज्ञानयज्ञाः ।

745. **यज्ञशिष्ट**—यज्ञशिष्टाशिनः—[विग्रहपद्धत्यै 'अशिन्' (१) शब्दो द्रष्टव्यः] ।

746. **यज्ञशिष्टामृत**—यज्ञशिष्टामृतभुजः—(विग्रहपद्धत्यै 'भुज्' शब्दः द्रष्टव्यः) ।

747. **यज्ञाध्ययन**—वेदयज्ञाध्ययनैः—वेदाध्ययनैर्यज्ञाध्ययनैश्च । यज्ञाध्ययनमत्र यज्ञविज्ञानोप-लक्षणार्थमिति श्रीशङ्कराचार्याः ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



